No. १४०१

Title अनुमान चिन्तामणि टीका
मूल माथुरीत्यभिधा

Author मथुरानाथः

Extent ७३ Age ×

Subject न्यायवैशेषिकं

पत्रं २१, २२, २३, २९, ३० नहीं हैं।

[illegible]

१५०९

श्लो २०००

नं॰ ६४०६

अनुमानेमूलमाधुरी वस्त ११

९१

'यद्यपीदं बहुभिर्बहुधा वर्णितं ज्ञायते च केश्चित्सामान्यतो हेत्वाभासांतं तथापि तन्नानास्थानविततमशेषा प्रकाशकं बहुतरकुतर्क
मू.म.स्त्र. संवलितमसांप्रदायिकं चातो व्यामोहायैव केवलं सर्वेषां भव श्री तीति सर्वानुजिघृक्षया मत्तर्कभामूलव्याख्यानायैवेशाध्याय एमभात्रपरंत्विबंधः ५

श्रीवेंकटेशायनमः। श्रीगुरुभ्यो नमः। गणेशायनमः॥ श्रीन्यायांबुधिकृत्तसेतुं हेतुं
1 श्रीनाममखिलसंपत्तेः। तातं त्रिभुवनगीतं तर्कालंकारमाद्यमानस्यां॥ १॥ श्रीम
१ तामथुरानाथतर्कवागी शधीमता। विशदीकृसदर्शितेद्वितीयमणिफक्कि
काः॥ २॥ आन्वीक्षिकीपंडितमंडलीषु सतांडवेरध्ययनं विनापि मदुक्तमेत
त्परिचिंत्य धीरा निःशंकमध्यापनमातनुध्वं॥ ३॥ प्रत्यक्षं निरूपितमिदानीम
ना नुमानं निरूपणीयमतः त्रिधावधार्यप्रतिजानीयते प्रत्यक्षो[illegible]या दि
ना। अन्यथाऽरण्यरुदितं स्यादिति भावः। प्रत्यक्षानंतरं प्रत्यक्षनिरूपणानंतरं उप
मान निरूपणात्प्राक् अनुमानं निरूप्यत इत्यन्वयः। निरूप्यते लक्षणस्वरूपप्रामाण्या
दिभिर्ज्ञाप्यते लक्षणस्वरूपप्रामाण्यादिप्रकारकज्ञानानुकूलव्यापारविषयोऽ
नुमानमित्यर्थः। व्यापारः शब्दप्रयोग एव तद्विषयता व्यापारानुबंधित्वेन प्रत्यक्षा
मानात्प्राक् उप ३ राम
१

थानुमानग्रंथयोरेकवाक्यताप्रतिपत्तये प्रत्यक्षानुमानयोः संगतित्वरूपेणासं
गतिमपि दर्शयति। प्रत्यक्षोपजीवकत्वादिति। अनुमानस्य प्रत्यक्षकार्यत्वादित्यर्थः।
भवति हि व्याप्तिज्ञानात्मकमनुमानमिंद्रियात्मकस्य प्रत्यक्षफलमिति भावः। अ
त्र ज्ञानजिज्ञासाप्रयोजकत्वं पञ्चमम्यर्थः। अन्वयश्चास्य प्रत्यक्षानंतरनिरूपणे
तथा च प्रत्यक्षोपजीवकत्वं ज्ञानजन्यजिज्ञासाप्रयोजकप्रत्यक्षानंतर
निरूपणविषयोऽनुमानमित्यर्थः। एतेन संगतित्वेन संगतिर्दर्शिता। अनंतरा
भिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वं हि संगतित्वं तथा चानं
तराभिधाने प्रत्यक्षकार्यत्वज्ञानजन्यजिज्ञासाप्रयोजकत्वग्रहे प्रत्यक्षका
र्यत्वेपि अनंतराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वस्य
ग्रहात्तुल्यवित्तिवेद्यत्वेन उत्तरकालं मानसबोधसंभवात्। एकवा

मलं च एकप्रयोजनकप्रतिपत्तिविषयार्थकत्वं पूर्वग्रंथार्थप्रतिपत्तिप्रयोजनक
प्रतिपत्तिविषयार्थकत्वमिति यावत्। प्रयोजने तु परंपरया मुक्तिरेव एकवाक्यता
२ प्रतिप[illegible]त्तौ च संगतिदर्शनं लिंगज्ञानविधया हेतुः। यच्च संगतिमत्प्रतिपादक
वाक्यं भवति तत्तत्प्रतिपादकग्रंथे नैकवाक्यं भवति यथा संनिकर्षादिग्रंथ एव प्रत्यक्ष
स्य कार्यत्वे लैंककार्यकारित्वादिसंगतिमत्प्रतिपादकं वाक्यं भवति प्रत्यक्षप्रतिपाद
कग्रंथे नैकवाक्यमपि भवतीति व्याप्तेः। न चैतादृशैकवाक्यताप्रतिपत्तिर्न प्रकृ
तोपयोगिनीति वाच्यं। तत्प्रतिपत्तेः प्रत्यक्षग्रंथप्रयोज्यफलेच्छावतोऽनुमान
ग्रंथप्रवृत्तावुपयोगित्वात्। ननु अनुमाने प्रत्यक्षोपजीवकत्वं तत् चक्षुराद्यात्म
कप्रत्यक्षेऽप्यनुमानोपजीवकत्वस्याविशिष्टतयाऽनुमाननिरूपणानंतरं
प्रत्यक्षनिरूपणापत्तिः। भवति हि कार्यमात्रेऽदृष्टस्य हेतुतया चक्षुरादाव

प्यदृष्टं हेतुः। तच्चादृष्टं दीपदानादौ प्रवृत्त्यात्मप्रवृत्ती दीपदानादौ दृष्ट
साधनतायनुमानादिप्रदृष्टद्वारा चक्षुरादिकमनुमानोपजीवकं। नचादृष्ट
द्वारकोपजीवकत्वमेव संगतिरिति वाच्यं। दृष्टसाधनतानुमिति हेतुकप्रवृ
दि त्त्यां क्रमेण घर्षणादिनाजनितायां खंड चक्षुरादिव्यक्तावदृष्टद्वारापि परंपर
यानुमानोपजीवकत्वस [redacted] त्वात्। नच प्रवृत्ति द्वारकं जन्यत्वरूपं चाउप
जीवकत्वमेव संगतिरिति वाच्यं। मनसोनुमानत्वनये आत्ममनःसंयोगस्य
निर्विकल्पकादिद्वारा प्रत्यक्षप्रमितिकरणत्वेन प्रत्यक्षप्रमाणरूपस्य साक्षा
न्मनोरूपानुमानजन्यत्वेन तादृशानुमानोपजीवकं स्यापि प्रत्यक्षे सत्वात्। ७
एतेन याक्षिकिंचित्प्रमिति विभाजकोपाध्यवच्छिन्न निरूपितफलोपधानात्मक
करणत्वावच्छेदेन उपजीवकत्वमेव संगतिः। तच्चानुमान एवास्ति। ननु

इंद्रियात्मकप्रत्यक्षप्रमाणे मनःश्रवणयोरजन्यत्वात्फलोपधानात्मकत्वविवक्षणा
दीश्वरीयव्याप्तिज्ञानस्या समदाद्यनुमितिस्वरूपयोग्यकरणत्वेप्यनुमानानिष्ठप्र
२ त्यक्षोपजीवकत्वस्य न संगतित्वहानिरित्यपि प्रयुक्तं। मनसोऽनुमितिकरणत्वेन
पञ्चअनुमितिकरणत्वावच्छेदेनापि प्रत्यक्षोपजीवकत्वा [redacted]
भावात्ताहशोपजीवकत्वस्यैवसंगतित्वे शाब्दोपमानोपजीवकत्वस्याप्यसंगतित्वापा
३ ताच्च व्यवहारादितोपि शाब्दितिग्रहात् शाब्दधीकरणत्वावच्छेदेनोपमानोपजी
वकत्वाभावादिति चेन्न। प्रत्यक्षानुमानयोः परस्परं उपजीवकत्वाविशेषेपि यद्य
दुपजीवकं तत्तन्निरूपणानंतरं निरूप्यमिति नियमाभावादेव अनुमाननिरूप
णानंतरं प्रत्यक्षनिरूपणप्रसंगाविरहात् प्रत्यक्षानंतरमेवानुमानं निरूपि
तं नत्वनुमानानंतरं प्रत्यक्षमित्यत्र तु स्वतंत्रेच्छस्येति न्यायेन छायाएवबीजत्वादि
त्यादिक्॥ अनुमानग्रंथोपमानग्रंथयोरेकवाक्यताप्रतिपत्तये अनुमानोपमा

नयोरपिसंगतिमत्रैव दर्शयती बहुवा दीति ॥ नचैतत्प्रदर्शन मुपमान नि रू
पणा वसरे एवोचितामितिवाच्यं। स्वतंत्रेच्छस्य नियंतुमशक्य त्वात्। नचतथा
प्यनुमानस्य बहुवादि संमत त्वोक्ति र्तना कथमुपमाने सं गति रिति वाच्यं। ब
हुवादिसंमतत्वादि यस्योपमाने नुमानोपजीवक त्वादि सर्थोत् भवति चगोस
दृशोगवय पद वाच्य इत्यातिदेशवाक्यार्थज्ञानात्मको पमानं गवादि पद शक्तिग्रा
हकानुमानोपजीवक मितिभावः। अत्रापि ज्ञान अन्याजिज्ञासा प्रयोज्य त्वं पंच
म्यर्थः। अन्वयस्तस्य उपमानादि यत्र उपमान पदार्थे उपमान निरूपणे। दीधि
तिकृतस्तु। बहुवादि संमतत्वोक्ति र्तने नवसर संगतित्वं मुच्यते। तथाहि। अनु स्य २
मानस्य बहुवादि संमतत्वेन निरसनीया त्मविप्रतिपत्तिकतया बहुताद्
स्वाजनक प्रतिपत्तिकत्वादत्रैव प्रथमं व्युत्पित्सोर्जिज्ञासानो पमाने तस्या

वादि २

त्मवादिसंमतत्वेननिरसनीयबहुवादिविप्रतिपत्तिकतयाबहुतरदुःखानुबं
धिप्रतिपत्तिकत्वात् तथाचानुमानेप्रथमंप्रतिबंधकीभूतान्निरोध्याजिज्ञासेप्रवृत्तौत
४ न्निरूपणेचतन्निवृत्तेरवसरसंगत्याउपमाननिरूपणमितिभावइत्याहुः।
५ मि तन्नयेज्ञानप्रयोज्यप्राथम्यकजिज्ञासाप्रयोज्यत्वमेवात्रपंचम्यर्थः।अन्वयश्चा
स्यउपमानात्प्राक्निरूपणो। एवंचबहुवादिसंमतत्वज्ञानप्रयोज्यप्राथमि
कजिज्ञासाप्रयोज्यउपमानप्राङ्निरूपणाविषयोनुमानमित्यन्वयइतिध्ये
यं।मिश्रास्तु।प्रत्यक्षोपजीवकत्वादित्यादिनिरूप्यतइत्यंतग्रंथोऽत्रकस्यचि
त्कल्पित ः।नतुवास्तविकःपाठः।अथानुमानंनिरूप्यतइत्येवपाठोवास्त
विकः।तावतैवसिद्धसाध्यसमभिव्याहारलभ्यस्यहेतुहेतुमद्भावस्यप्रतिबंध
कीभूतजिज्ञासानिवर्तकसिद्धत्वकथनेनावसरस्यवासंगतित्वलाभसं

पु भवादन्यथाशब्दखंडे उपमानोपजीवकत्वादुपमानानंतरं शब्दो निरूप्यते इ
त्यस्यवक्तव्यत्वापातादित्याहुः। अनुमितेः प्रत्यक्षादिप्रमितिभिन्नत्वज्ञानं विनाऽ
नुमितिकरणत्वेन हेतुना अनुमानस्य इतरभिन्नत्वज्ञानं न संभवति अनुमितिप्र
त्यक्षयोरभेदग्रहात्प्रत्यक्षादिप्रमितिकरणे व्यभिचारज्ञानापत्तेः। अतः प्रथमतो
ऽनुमितेरितरभेदानुमापकमाह तत्रेति। अतो नार्थान्तरावकाशः। केचित्तु। अनु
मितिकरणत्वमनुमानलक्षणं करणीयं तत्त्वज्ञानं च नानुमितिज्ञानं विना
संभवति तस्य तद्घटितमूर्तिकत्वादतः प्रथमतोऽनुमितिं ज्ञापयति तत्रेति। अतो
नार्थान्तरावकाश इत्याहुः। तत्र कर्त्तव्ये लक्षणादिप्रकारकानुमाननिरूपणे स
म्यगर्थो विशेषणात्। अन्वयश्चास्यानुमितिरियन्नेन तथा च कर्त्तव्ये लक्षणादि
प्रकारकानुमाननिरूपणे विशेषणीभूतानुमितिरीदृशं ज्ञानमित्यन्वयः॥ ६॥

व्याप्तिविशिष्टेति। व्याप्तिविशिष्टं च तत्पक्षधर्मताज्ञानं चेति कर्मधारयसमासः। तथा च व्या
प्तिविशिष्टं व्याप्तिप्रकारकं यत्पक्षधर्मताज्ञानं हेतोः पक्षे संबंधज्ञानं तज्जन्यज्ञानमनुमि
तिरित्यर्थः। भवति च पर्वतो वह्निमानित्याद्यनुमितिर्वह्निव्याप्यधूमवान्पर्वत इत्यादिव्याप्ति
५ प्रकारकपक्षनिष्ठहेतुसंबंधज्ञानजन्येति लक्षणसमन्वयः। अत्र धूमवान्पर्वत इत्या
दिकेवलपक्षधर्मताज्ञानजन्ये तदनुव्यवसाये धूमवत्पर्वतवान्देश इत्यादिविशिष्टवै हेतु
शिष्ट्यबोधादौ चातिव्याप्तिवारणाय व्याप्तिप्रकारकेति। न च पक्षविशेष्यकसंबंध
ज्ञानत्वेन हेतुत्वविवक्षणेऽप्येतद्दोषवारणसंभव इति वाच्यं। असंभवापत्तेरनुमिताव
पितेन रूपेणाहेतुत्वात्। वह्निव्याप्यो धूम इत्यादिकेवलव्याप्तिप्रकारकज्ञानजन्ये
वह्निव्याप्यधूमवान्पर्वत इत्यादिज्ञानेऽतिव्याप्तिवारणाय पक्षधर्मतेति। वह्निव्याप्य
धूमवान्पर्वत इत्यादिपरामर्शजन्यसंस्कारेऽतिव्याप्तिवारणाय चरमज्ञानपदं। ननु
तथापि वह्निव्याप्यधूमवन्महानससदृशः पर्वतपदवाच्य इत्यत्र देशवाक्यार्थज्ञा राम

नजन्यायामयं पर्वतपदवाच्य इत्युपमितावतिव्याप्तिः। तज्ज्ञा[illegible]नकीभूतस्यातिदेशवा
वाक्यार्थज्ञानस्यायं वन्हिव्याप्यधूमवन्महानससदृश इति सादृश्यप्रत्यक्षस्य च व्या
प्तिप्रकारकपक्षधर्मताज्ञानत्वात्। ईश्वरीयतादृशज्ञानमादाय घटादिशाब्दबोधा
दावतिव्याप्तिः। न च व्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यत्वमत्र तादृशनिश्चयत्वा
वच्छिन्नजनकताप्रतियोगिकजन्यत्वमिति नोपमितावतिव्याप्तिः। तत्र तादृशनिश्च
यत्वेनाहेतुत्वादिति वाच्यं। असंभवापत्तेः। वन्हिव्याप्यो धूम आलोकवान्पर्वतः वन्हिव्या
दि ५ प्यो धूमः धूमवान्पर्वत इत्यादिज्ञानादप्यनुमितिप्रसंगादनुमितावपि तेन रूपेणाहेतु
त्वात्। न च व्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यत्वं पक्षविशेष्यकसंबंधावगाहितां
शे व्याप्तिप्रकारकनिश्चयत्वावच्छिन्नजन्यत्वं पक्षविशेष्यकसंबंधावगाहितांशे व्या
प्तिप्रकारकत्वं च व्याप्तिविशिष्टवैशिष्ट्यावगाहित्वपर्यवसन्नमिति नासंभवः। वन्हि
व्याप्यो धूम आलोकवान्पर्वत इत्यादिज्ञानस्य व्याप्तिविशिष्टवैशिष्ट्यावगाहित्वाभा

वादनुमितौतेनरूपेण हेतुत्वेबाधकाभावादिति वाच्यं। व्याप्तेसामानाधिकरण्यानति
रेकतयावह्निसमानाधिकरणधूमवान्पर्वतइत्यादिज्ञानादप्यनुमितिप्रसंगादनुमि
तौतेनरूपेण हेतुत्वादिति चेन्न।। हेत्वधिकरणेप्रकारः धिकरणं वृत्तित्वे वृत्तित्वमभावेऽ
भावः प्रतियोगितायां प्रतियोगित्वमवच्छेदके अवच्छेदकमन्योन्याभावेऽन्योन्याभावः साध्य
तावच्छेदके साध्यतावच्छेदकं साध्ये साध्यमधिकरणेऽधिकरणं वृत्तित्वे वृत्तित्वं हेतौ हेतुः
पक्षे इत्याकारकविलक्षणविषयताकनिश्चयत्वावच्छिन्नजनकताप्रतियोगिकजन्यता
याविवक्षितत्वात् अतएवप्रथमज्ञानपदमपि सार्थकं संशयान्यतादृशविलक्षण
विषयताकत्वेन हेतुत्वप्रवेशोऽसंभवापत्तेः। इच्छादितोनुमितिअनुत्पादादनुमितावपि
तेनरूपेणाहेतुत्वात्। नचानुमितावगृहीताप्रामाण्यकतादृशनिश्चयत्वेनैव हेतुत्वाद
असंभव इति वाच्यं। विशेषणविशेष्यभावे विनिगमनाभावेनाप्रामाण्यग्रहाभावस्यपृ
थगेव हेतुतयाकारणतावच्छेदके तस्याप्रवेशात्तस्यप्रवेशेपि अधिकं त्विति न्यायेन ता
दृशनिश्चयत्वस्य कारणतावच्छेदकत्वानपायाच्च। अथ तथापि वह्निव्याप्यधूमवत्स

र्त्तवान्देश इत्यादि विशिष्टवैशिष्ट्यप्रत्यक्षे तादृशविशिष्टवैशिष्ट्य [illegible] शाब्दबोधे
चातिव्याप्तेः। रक्तो दण्डो न वेति संशये रक्तदण्डवानिति ज्ञानानुदयात्तत्तद्विशिष्टवैशिष्ट्य
ज्ञानं प्रति तत्तद्विशेषणतावच्छेदकप्रकारकतत्तद्विशेषणनिश्चयत्वेन कारणतया
तत्रापि यथोक्तनिश्चयत्वेन हेतुत्वादिति चेत् न। अभावाविषयकत्वेन प्रतियोगित्वा
५२ विषयकत्वेन वा वाच्यं ज्ञानविशेषणात्व यथोक्तविशिष्टवैशिष्ट्यप्रत्यक्षादेश्च व्याप्ति क६
६तया घटकाभावादिविषयत्वात्। नन्वेवं पक्षधर्मतापदवैयर्थ्यं तादृशविलक्षणव्याप्ति
प्रकारिताकनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्यताशाल्यभावाविष
यक [illegible] ज्ञानत्वस्यैव सम्यक्त्वात् वह्निव्याप्यो धूम इत्यादि केवलव्याप्तिप्रका
रकज्ञानजन्यस्य वह्निव्याप्यधूमवान्पर्वत इत्यादिज्ञानस्य व्याप्तिघटकतयाऽभावा
दिविषयत्वेनैव वारणादिति वाच्यम्। असंभवापत्तेः। अनुमितिं प्रत्यपि तेन रूपेणाहे
तुत्वात्। तादृशव्याप्तिप्रकारताकनिश्चयत्वमपेक्ष्य लाघवेन ज्ञानत्वेन मनस्त्वे

क२

७ नवाऽनुमितिंप्रतिकरणत्वासंभवःपरामर्शहेतुतयैवातिप्रसंगभंगात्।अतएवस्थाणुर्न
वेतिसंशयोत्तरंजायमानेऽयंस्थाणुरितिप्रत्यक्षेइदंरजतंनेतिभ्रमोत्तरंजायमा
नेइदं रजतमि ति प्रत्यक्षेचस्वातंत्र्येणविशेषणज्ञानविधयैवस्थाणुत्व वा३
४२ [illegible] व्याप्यवत्त्वकोटरादिमान्जनतत्वव्याप्यवाकचक्यविशेषवानि त्यादि
विशेषदर्शनस्यव्याप्तिप्रकारकपक्षधर्मतानिश्चयात्मकस्यजनकत्वेऽपिनाति
व्याप्तिः।विशेषदर्शनस्यविपरीत [illegible] विरोधित्वेनविशेषणज्ञानत्वेनवा ज्ञान६
हेतुतयातत्रतादृशनिश्चयत्वेनाकारणत्वात्तत्रव्याप्तिरूपनीतभानसा
मग्रीसत्त्वेनव्याप्तिघटकतयाऽभावादिविषयकत्वाच्चानवानमानत्वेस्यादौ
तद्वत्त्वेनव्याप्यादिविशिष्टोपस्थितिद्वाराजानेतेवह्निव्याप्यधूमवान्पर्वत
मानत्वेस्यादि शाब्दबोधेमहावाक्यार्थज्ञानस्यपदार्थोपस्थितिविधयाऽ
नंतरवाक्यार्थज्ञानजन्यतयोप नयार्थज्ञानजन्येन्यायार्थज्ञानेवातिव्या राम

प्तिः। पदार्थोपस्थितेः कारणतावच्छेदकेऽतिरिक्तस्य पदज्ञानजन्यत्वस्य प्र
विष्टतया निश्चयत्वस्याप्रविष्टतया च तत्रापि तादृशनिश्चयत्वेनाकारणत्वा
त्। व्याप्तिघटकतयाऽभानादिविषयकत्वाच्च। नापि परामर्शोऽनुव्यवसाये
वह्निव्याप्यो धूमः धूमवान्पर्वतो वह्निव्याप्यधूम आलोकवान्पर्वत इत्यादि
ज्ञानानुव्यवसायेनाविषयविधया परामर्शस्य तादृशज्ञानस्य च हेतुत्वेऽप
त्तिव्याप्तेः। अनुव्यवसायं प्रति परामर्शादेर्विषयत्वेन तत्र स्वव्यक्तित्वेन च हेतु
तया तत्रापि यथोक्तनिश्चयत्वेनाकारणतात्। व्याप्तिघटकतयाऽभानादि
विषयकत्वाच्चावमनुमितिवदापत्तावपि परामर्शस्य हेतुत्वे प्यापत्तौ नाति
व्याप्तिः। तत्राप्रामाण्यज्ञानास्कन्दितयथोक्तनिश्चयत्वेन हेतुतया कारणता
वच्छेदकेऽतिरिक्तस्याप्रामाण्यज्ञानास्कन्दितत्वप्रवेशात् व्याप्तेरुपनीतभा स्य
नसामग्रीसत्त्वेन व्याप्तिघटकतया तस्याऽभानादिविषयकत्वाच्च। न वा वह्नि

व्याप्यधर्मवान् पर्वत इत्यादिविशिष्टस्मरणे तादृशादिविशिष्टानुभवस्य हेतुत्वे व्याप्ति
व्याप्तिः। तस्य व्याप्तिघटकतयाऽभावादिविषयकत्वात्। तत्र तादृशाविलक्षणावि
८ षयताकज्ञानत्वेन ज्ञानत्वेन वा तादृशविशिष्टानुभवस्य हेतुतया तादृशाविल
8 क्षणविषयताकनिश्चयत्वेनाजनकत्वाज्ज्ञानं चैवं तादृशसंशयात् स्मृत्याप
त्तिः संस्काराभावादेव ततः स्मरणानुपपत्तेः संस्कारं प्रति तादृशानिश्चयत्वेन
वहेतुत्वात्। न च विनिगमकाभावः संशयस्थले संस्कारादिकल्पनागौरव
स्यैव विनिगमकत्वादिति [illegible] दृष्टव्यं। न च अभावाद्यविषयकत्वेन चेर
४ ज्ञान मौ विशेषणेऽभावादिविषयकानुमितौ व्याप्तिः। साध्यहेत्वादेरननुग
मादेकोपादानेऽन्यानुमितौ व [illegible] व्याप्तिः। व्यतिरेक्यनुमितौ वा व्याप्तिः।
तत्र यथोक्तविलक्षणविषयताकनिश्चयत्वेनाहेतुत्वादिति वाच्यं ता
दृशकार्यताव [illegible] दभावाद्यविषयकज्ञानं च तत्प्रत्यक्षासमवेतधर्मसम

वाप्यित्वस्याविवक्षितत्वात्‌ऽइयं च पर्वतो वह्निमान्घटः सत्तावानित्याद्यन्वय
व्याप्तिज्ञानजन्याभावाद्यविषयकानुमितिव्यक्तिमादायैवाभावादि विषयका
नुमितौ अन्यसाध्यका नुमितौ व्यतिरेक्यनुमितौ च लक्षणसमन्वयः। तद्व
मीताद्दशधर्मस्यानुमितित्वस्य सर्वत्र सत्वात्‌। अत्र सत्तागुणात्वज्ञानत्वानुम
वत्वमादायातिव्याप्तिवारणाय प्रत्यक्षासमवेतेति। कालिकसंबंधेनानुमिति
त्वस्यापि प्रत्यक्षवृत्तितादतिव्याप्तिवारणाय समवायेत्यामिति। नचैवं चर
मज्ञानपदं व्यर्थं। परामर्शाजन्यसंस्कारस्य व्याप्तिघटकतयाऽभावादि वि
षयकत्वेनैव वारणादिति वाच्यं समवायेन ताद्दशकार्यतावदभावादिविष घ
यकवृत्तितालाभाय तदुपादानादन्यथा जन्यमात्रस्य कालोपाधितया
कालिकसंबंधेन संस्कारत्वस्य घटत्वादेरप्यनुमितिवृत्तितयाऽतिव्याप्ता

पत्तेः। वस्तुतस्तु नाहृश्यकार्यताश्रयज्ञानसमवेतप्रत्यक्षासमवेतधर्मसमवायित्वं
मेव वक्तव्यं। न तु भावाद्यविषयकत्वेन ज्ञानं विशेषणीयं। दंडे रक्तो न वेति संशयो
त्तरमपि रक्तत्वतदभाववद्दंडवानिति रक्तत्वांशे संशयाकारस्य रक्तत्वतदभाववि
शिष्टवैशिष्ट्य [redacted] विषयताकज्ञानस्यानुभवसिद्धतयाऽलाघवात् तच्चाद्विशेष
णतावच्छेदकप्रकारकतत्ताद्विशेषणज्ञानत्वेनैव विशिष्टवैशिष्ट्यबोधं प्रति
हेतुतया वह्निव्याप्यधूमवत्पर्वतवान्देश इत्यादिविशिष्टवैशिष्ट्यबोधेऽति शाब्द६
व्याप्तिविरहात्तस्य कारणतावच्छेदके निश्चयत्वस्याप्रवेशाद्धेतुतावच्छेदकरू दि५
पेणाहत्वादिभिन्नविषयकभ्रमरूपपरामर्शादप्यनुमित्युत्पत्त्याऽनुमितेः का
रणतावच्छेदके हेत्वादेश्चाप्रवेशः। विशिष्टवैशिष्ट्यबोधस्य कारणतावच्छेद शाब्द३
के च हेत्वादेरवश्यं प्रवेशः। हेतुतावच्छेदकरूपेणाहत्वादिभिन्नविषयकनिश्च दि२
याद्धेतुतावच्छेदकरूपेणाहेत्वादिविषयकविशिष्टवैशिष्ट्यबोधानुपपत्तेर राम

तो निश्चयत्वस्य तत्कारणतावच्छेदके प्रवेशोऽप्यतिव्याप्तिविरहात्। अनुमितिं
प्रति परामर्शस्य येन रूपेण कारणता तदवच्छिन्नकारणताया एव लक्षणघ
टकत्वात्। आपन्नेश्च कारणतावच्छेदकेऽप्रामाण्यज्ञाना नास्कंदितत्वस्याघ
कस्य प्रवेशादेव वारणात्। प्रत्यक्षासमवेतेत्यनेनैव वारणात्। इदं च परामर्
शजन्यसंस्कारवारणाय। एवं चरमज्ञानपदं न च आभासाविषयकत्वविशे
षणानुपादाने यत्र विषयविशेषे नियमतो वह्निव्याप्यधूमवत्पर्वतनिश्चय
एवोद्बोधक [illegible] स्तादृशविषयविशेषस्मृतिमादाय स्मृतिमात्रेऽ
तिव्याप्तिः। तत्र लाघवात्सामान्यतो वह्निव्याप्यधूमवत्पर्वतनिश्चय
त्वेनैवोद्बोधकत्वादिति वाच्यं। चरमज्ञानपदस्यानुभवपरत्वात्। त
था च तादृशाविलक्षणया विषयताकनिश्चयत्वावच्छिन्नकारणताप्रतियोगिक
कार्यताश्रयानुभवसमवेतप्रत्यक्षासमवेतधर्मसमवायित्वमिति लक्षणं

विषयाहेतु

न्द० मा० रा० अ०

हेतुभेदेन हेतुतावच्छेदकभेदेन वाऽनंतकार्यकारणभावापत्त्या परामर्शो नानुमितौ हेतुः किंतु यद्यल्लिंगपरामर्शानंतरं तत्तत्पक्षकतत्तत्साध्यकानुमितिरनुभवसिद्धा तत्तल्लिंगकपरामर्शाभावकूटविशिष्टात्मत्वमेव तत्तत्पक्षकतत्तत्साध्यकानु

१०

फलितं। अतो न कोपि दोष इति संप्रदायस्तदसत्। अनुमितिपरामर्शयोरस्तु न

घटितत्वेनैव हेतुहेतुमद्भावेनानुमिताववच्छिन्ना दृशानिश्चयत्वेनाहेतुत्वादसंभवापत्तेः। नव्यास्तु येन परामर्शेना व्यवहितोत्तरमनुमितिरेव जन्यता तादृशपरामर्शविशेषपरं व्याप्तिप्रकारकपक्षधर्मताज्ञानपदमिति न काप्यदि[?]

तादृशपरामर्शविशेषपरं व्याप्तिप्रकारकपक्षधर्मताज्ञानपदमिति न काप्य

ति व्याप्तिः। जन्यत्वं चैकात्मावच्छेदेनाव्यवहितोत्तरवर्तित्वमन्यथा तादृशानिश्च

१० २ पे

यत्वावच्छिन्नकारणत्वनिरूपितजन्यत्वस्य प्रवेशोऽत्वरीयाऽसंभवापत्तेः। जन्य

तासामान्यनिवेशे ज्ञानत्वेन कार्यत्वेन विशेषणज्ञानत्वेन विशिष्टबुद्धित्वेन

सादिरूपेण कार्यकारणभावमादाय शाब्दबोधादेरपि तादृशपरामर्शविशे

षजन्यत्वेनातिव्याप्त्यापत्तेः। नचैवं परामर्शानंतरजन्यानुमितौ नव्याप्तिरिति

वाच्यं। तादृशज्ञानत्वस्य प्रत्यक्षासमवेतधर्मसमवायित्वस्य विवक्षितत्वात्।

समवायेन तद्घटिततालाभाय चरमज्ञानपदं। नचैवं यां कांचिदनुमितिं व्यक्ति

राम १०

त्वादिकमादाय विनिगमनाविरहः नचैतत् तथापि परामर्शाभावकूटानां परस्परं विशेषणविशेष्यभावे विनिगमकाभावात् गुरुतरानं

तकार्यकारणभावापत्तिर्दुर्वारैवेति वाच्यं। परामर्शाभावानां परस्परं विशिष्टस्याभावादेशविशेषणताघटिततया परामर्शाभावात्वे

१५ मुँ दायतद्व्यक्तिसमवेतप्रत्यक्षासमवेतधर्मसमवायित्वमेव लक्षणमास्थिति
वाच्यौ। तस्यापि लक्षणांतरत्वात्। प्रकृते च तस्याप्रवेशेन वैयर्थ्याभावात्। इयं
च व्याप्तिविशिष्टस्य व्याप्तिविशिष्टे वा पक्षधर्मता व्याप्तिविशिष्टपक्षधर्म
तेति षष्ठीसप्तमीतत्पुरुषाभ्यां व्याप्तिविशिष्टवृत्तिर्या पक्षधर्मता तज्ज्ञानजन्यं
ज्ञानमनुमितिरित्यर्थोऽपि संभवति। धर्मवान्पर्वत इत्यादिज्ञानजन्यानुव्यव वह्निव्याप्य ५
सायादौ वह्निव्याप्तिज्ञानपदस्य ज्ञानविशेषपरत्वेनैव वारणात्। ह्रदो व
ह्निमानित्यादिभ्रमानुमितेर्वह्निव्याप्यजलवान्पर्वत इत्यादिभ्रमजन्यपर्व
तो वह्निमानित्यादिप्रमानुमितेश्च तादृशधर्मघटनयैव [redacted] संग्रहात्। संग्रह ४
एवं व्याप्तिविशिष्टस्यासौ पक्षधर्मश्चेति व्याप्तिविशिष्टपक्षधर्मस्तस्य
भावः व्याप्तिविशिष्टपक्षधर्मतेति कर्मधारयोत्तरभावप्रत्ययेन व्याप्तिवि भाव २
शिष्टत्वसमानाधिकरणपक्षधर्मताया ज्ञानजन्यं ज्ञानमनुमितिरि

॥ प्रर्थोपि संभवाति। भ्रमानुमितेस व्याप्यादेर्यथो रूपेणैव वारणात्। ए
११ वं व्याप्तिविशिष्टं च पक्षधर्मश्च व्याप्तिविशिष्टपक्षधर्मौ तयोर्भावस्तत्त्वं
ज्ञान३ तज्ज्ञानजन्यमिति द्वन्द्वोत्तरत्वप्रत्ययेन व्याप्तिविशिष्टत्वपक्षधर्मत्वोभ
यविषयकज्ञानजन्यं ज्ञानमनुमितिरित्यर्थोपि संभवाति। धूमो वह्निव्याप्यः
आलोकवान् पर्वत इति ज्ञानजन्ये धूमो वह्निव्याप्यः धूमवान् पर्वत इति ज्ञान इत्यादि ६
५ ज्ञान जन्ये चातिव्याप्ति ज्ञानपदस्य विशेषपरत्वेनैव वारणादिति प्राहुः
॥ केचित्तु व्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यत्वमेव लक्षणं जन्य
त्वं च परामर्शत्वावच्छिन्नकारणताप्रतियोगिकं ग्राह्यं। परामर्शत्वं चा
नुमितित्वावच्छिन्नकार्यताप्रतियोगिककारणतावच्छेदकं तथा च
जो मानसत्वव्याप्यो जातिविशेषः। सर्वत्र मानसपरामर्शादेवानुमि

यभ्युपगमात्‌। क्षपाविलंबस्य न्यापथानिर्णेयत्वात्‌। एवं च न काप्य
तादृश२ तिप्रसंगः। अन्यत्र जातिविशेषेणाहेतुत्वात्‌। इत्थं च तादृशधर्म
घटनापि न कृत्तेव्या। वह्निव्याप्यधूमवान्पर्वत इति निश्चयस्य प
रामर्शत्वावच्छिन्नकारणतानिरूपितानुमितित्वावच्छिन्नजन्य
तायाः अनुमितिमात्र एव सत्त्वात्‌। आपत्तेश्च कारणतावच्छेदके
ऽप्रामाण्यज्ञा[redacted] नास्कंदितत्वस्योपाधिकस्य प्रवेशादेव वारणा
त्‌। आपत्तीतरत्वेन वाचरमज्ञानं विशेषणीयमित्याहुः॥ ५०॥ ति३

मल०मा

री३७०

१२

राम
१२

श्री नाम्य३ विशेष१

तत्करणमिति। तत्पदमनुमितित्वजातिविशिष्टपरं। तथा चानुमितेः करणमनुमानमि २ स्वद

त्यर्थः। ननु तत्करणमित्यत्र तच्छब्दस्यानुमितित्वजातिविशेषविशिष्टपरत्वेऽनुमान तु३ स्य३

मित्यत्रानुपूर्व्विकेमाधातुनुमितित्वजातिविशेषविशिष्टप्रत्यायनात्करणल्युटा च

करणप्रत्यायनादनुमितिकरणमनुमितिकरणत्ववदित्यनुमितिकरणत्वविशि

ष्टेऽनुमितिकरणत्वविशिष्टस्याभेदसंसर्गेणान्वयो वाच्यः। तथा चोद्देश्यतावच्छे

दकविधेययोरभेदाद्धटो घट इतिवत्पुनरुक्तिः। नच नामार्थयोर्भेदान्वयस्याव्यु

त्पन्नतया तत्करणमित्यस्यानुमितिसंबंध्यभिन्नमनुमितिकरणमित्यर्थः। तच्छ

ब्दस्यानुमितित्वजातिविशेषविशिष्टसंबंधिपरत्वात्। करणतायाः कार्यता घटित

त्वेन करणपदस्यानुमितिकरणपरत्वात्। अभिन्नत्वस्य च संसर्गत्वात्। अनुमा

नमित्यत्र तु धात्वर्थस्यानुमितेः ल्युटः प्रत्ययतया तदर्थेऽनुमितिकरणे करण

तासंबंधेनैवान्वयादनुमितिमदनुमितिकरणमित्यर्थः। करणतायाः कार्य

तावच्छेदक६

मू॰माथुरी

मि २

अनु॰ खं॰

घटितत्वेनानुमितिकरणत्वविशिष्टस्यैव ल्युडर्थत्वात्तथा चानुमितिसंबंधि

१७ मदनुमितिकरणमनुमितिमदनुमितिकरणाभिन्नमेवान्वयबोधाद्विधेयताव

१२ च्छेदकतापर्याप्त्यधिकरणधर्मवत्वस्योद्देश्यवाचकपदोत्थाभेन घटो नीलघ द ३

ट नीलसधर्मा घटो नीलघट इत्यादाविव नपौनरुक्त्यमिति [redacted] वाच्यं तथापि

करणपदल्युडादिपदयोः करणताघटकपदार्थे पृथगधिकरणत्ववृत्तित्वादि

पु खंडशक्तिनये पौनरुक्त्यस्य दुर्वारत्वात् अखंडशक्तिनयेऽनुमानमित्यत्र धा

त्वर्थत्वस्यानुमितेः आश्रयतासंबंधेन ल्युडर्थेऽधिकरणेऽन्वयवत्तकर

णमित्यत्रापि तत्पदार्थस्यानुमितेः करणपदार्थेऽधिकरणे आश्रयत्वेनान्व

२ रव्यय याद् इति चेन्न तत्पदार्थकरणपदार्थयोर्निपातातिरिक्तनामार्थतया ना घ २

मार्थयोर्भेदेनान्वयस्याव्युत्पन्नतया तदर्थस्यानुमितेराश्रयतासंबंधेन क

राम १३

रणपदार्थेऽन्वयासंभवात्। अन्यथा सकरणीसकर्मत्वमित्यादावपि तदीयक
रणत्वादिप्रसक्त्यापत्तेः। [redacted] न चैवं घटकरणे दंडइत्यादौ
खंडशक्तिनये घटवृत्त्यभावप्रतियोगितानवच्छेदक[redacted]घटितस्य घटक
रणत्वस्याप्रत्ययप्रसंगः। करणपदादधिकरणतद्वृत्तित्वादेरुपस्थितत्वेपि
घटस्य ततोऽनुपस्थितेरितिवाच्यं। करणादिपदस्य खंडशक्तिनयेपि का
६५ र्यत्वरूपेण कार्यवद्देशेप्यवश्यं शक्तेरुपगमात्। अन्यथा केवलकरणादि
पदात्तात्पर्यधीसत्वेपि विना कार्यता वाचकपदाध्याहारं घटादिकरणाप्रत्ययाप
त्तेः।। कार्यवृत्त्यभावप्रतियोगितानवच्छेदकत्वघटितकरणत्वे गौरवादधिकरणत्वे
नाधिकरणाप्रवेशादधिकरणांशे कार्यातिरिक्तस्याप्रकारतया कार्यवत्त्वरूपेणो
वकार्याधिकरणे करणादिपदस्य शक्तेरावश्यकत्वात्। अन्यथा पदाभि
र्विकल्पकोपस्थितेरनभ्युपगमे नाधिकरणस्य ततोऽनुपस्थितिप्रसंगात्

५ तदर्थनो

१४ न च कार्यवाचकघटादिपदस्यैव कार्यवति लक्षणा करणादिपदस्य तु केवलवृत्ति
त्वादिघ्येव शक्तिः कार्यवतो निरूपकतासंबंधेन वृत्तित्वेऽन्वयाद्यविशिष्टलाभ इ
३ केवल ति वाच्यं तर्हि लाघवात् करणादिपदस्य धर्मवत्येव शक्त्यापत्तेरितरांशस्य
४ न कार्यवाचकघटादिपदे लक्षणयैव लाभसंभवात् एतेन खंडशक्तिनये कर
१५ णादिपदस्य नामत्वेऽपि यथा भेदेन परस्परमन्वयो व्युत्पत्तिवैचि[redacted]त्तथा करणा त्र्याद्
दिपदसमभिव्याहृतषष्ठ्यादीतरविभक्त्यन्यतदादिपदार्थस्यापि करण
पदार्थे [redacted] भेदेनान्वयो व्युत्पत्तिवैचित्र्यादिति कस्यचित्सलपितमप्यपास्तं खं
डशक्तिनयेऽपि कार्यवदंशे शक्तेरावश्यकत्वे व्युत्पत्तिसंकोचे प्रमाणाभावात्।
तदादिपदस्य कार्यसंबंधिपरतया तादात्म्यसंबंधेनैवान्वयबोधसंभवात्॥
न च खंडशक्तिनयेऽपि कार्यवदंशे शक्तेरावश्यकत्वे कार्यभेदेन शक्तिभेदस्या

विशिष्टतया विशिष्टशक्तिपक्षमपेक्ष्य खंडशक्तिपक्षे किं लाघवमिति वाच्यं वैशि
ष्ट्यांशेंशान्यकल्पनादेव तत्र लाघवसंभवात् ऽथ च खंडशक्तिपक्षेपि प्रकृतेऽनु
मितिसंबंधिमदनुमितिकरणमनुमितिमदनुमितिकरणाभिन्नमित्यन्वयबोधा
न भ्युपगमात् किंतु तमदनस्वरूपतोऽनुमितित्वजातिविशेषविशिष्टपरं किंतु व्या
प्तिप्रकारकपक्षधर्मताज्ञानजन्यज्ञानवृत्तिप्रत्यक्षासमवेतधर्मत्वरूपेण तादृश
धर्मसमवायिपरं तथा च तादृशधर्मसमवायिकरणमनुमानमित्यर्थः। अतो न
पुनरुक्तिशंकापि। नन्वेवं तादृशधर्मसमवायिकरणत्वेनेतरभेदसाधने व्यर्थ
विशेषणत्वं तद्घटकस्य व्याप्तिज्ञानत्वस्यैव हेतुत्वसंभवात् न च व्याप्तिज्ञानत्वे
न व्याप्तिज्ञानत्वं न प्रविष्टमिति नवैयर्थ्यमिति वाच्यं। तथापि तादात्म्येन व्याप्तिज्ञान
स्यैव गमकत्वसंभवात्। न च व्याप्तेरननुगमेनैकतरव्याप्तिज्ञानस्य हेतुत्वेऽनुमिति

15 करणमात्रस्य पक्षत्वादंशतः सिद्धिरतस्तादृशधर्मसमवायिकरणत्वं सर्वसाधारण्यं हे
तुरिति वाच्यौ अधिक[redacted]स्य भागासिद्धिवारकत्वेपि व्याप्तिग्रहानुपयुक्ततया वैयर्थ्या
१५ दिति चेन्न। भिन्नधर्मिकतया धर्मप्रागभाववद्वैयर्थ्याभावात्। करणत्वनिष्ठव्याप्तेर्व्याप्ति
[redacted] ज्ञानत्वा[redacted]नवच्छेद्यत्वादित्याहुः। लक्षणमुक्त्वा स्वरूपमाह। तज्ज्ञेति अनुमानं चेत्यर्थः
हेतुनिष्ठ५ । लिंगपरामर्शो व्याप्तिज्ञानं। परामर्शस्य व्यापाराभावेनाकरणत्वात्। अन्ये तु नन्वे
तावताऽनुमितिकरणत्वमनुमानलक्षणमुक्तं भवति तत्कथं स्यात् ज्ञायमानलिंग
स्यानुमितिकरणत्वे नानुमानेतराप्रसिद्ध्येतरभेदानुमापकत्वाभावात् इतर
३ भेदानुमापकस्यैव लक्षणपदार्थत्वादित्यत आह। तज्ज्ञेतीति प्राहुः। वक्ष्यत इति। प
रामृश्यमानलिंगस्यानुमितिकरणत्वेऽतीतानागतलिंगादनुमितिर्न स्यादिति
दिकं भावः। लक्षणं निरूपितमिदानीं प्रामाण्यं निरूपयितुं प्रथमतः स्वार्थं किमत

माङ्गीकृते। अथेति। न प्रमाणो। न प्रमितिकरणी। ननु यदि अनुमानं अनुमितिकरणं
ष्ला २ न प्रमाणमित्यर्थस्तदाऽऽश्रयासिद्धिः त्वन्मतेऽनुमितिकरणस्याप्रसिद्धेः यद्यनुमानं भ २
धूमादि न प्रमाणमित्यर्थस्तदाऽसिद्धसाधनं व्याप्तिज्ञानस्यैव नैयायिकैः प्रमाण
स्तु ४ त्वोपगमादिति चेत्। अनुमानमित्यस्य व्याप्तिज्ञानमित्यर्थात्। न च तथाप्याश्रया
सत्वे ५ सिद्धिस्त्वन्मते सर्वत्र व्यभिचारसंशयेन व्याप्तिनिश्चयानुत्पादादिति वाच्यं। तन्म
ते संशयात्मकस्य तस्य प्रसिद्धेः। न चांशतः सिद्धसाधनं। पक्षतावच्छेदकावच्छे
देन साध्यसिद्धेरुद्देश्यत्वात्। न चानिर्विकल्पकद्वारा स्वप्रत्यक्षात्मकप्रमितिं प्र घ ४
ति करणत्वाद्बाध इति वाच्यं। निर्विकल्पकं प्रति करणत्वाभावात्। विशेषज्ञा
नस्य तु तन्मतेऽसद्विषयकत्वे [redacted] नाप्रमितित्वात्। अत्र च प्रमाजनकतावच्छेद
करूपमन्यत्वादिति हेतुरूपं। तत्र तन्मते इन्द्रियसं असम्मते व्याप्तिनि

1b

१६ श्रयत्वादिकमपि। नन्वयं हेतुस्वरूपासिद्धः। तादृशव्याप्तिनिश्चयस्यैव
सर्वत्रसत्वादि यत आह। योग्योपाधीनामिति। साध्यव्यापकतयागृहीतानां
मिंधनादिलक्षणयोग्यधर्माणामित्यर्थः। योग्यानुपलब्ध्या। योग्यतासहित
यानुपलब्ध्या। अभावनिश्चयेपीति। प्रत्यक्षतो व्यभिचारितासंबंधेनेंधे
मत्वादिरूपेणाभावस्य धूमादौ हेतौ निश्चयेपीत्यर्थः। तेनोपाधित्वस्यातीन्द्रि
यत्वेन तदवच्छिन्नाभावस्य लौकिकप्रत्यक्षा[redacted]गम्यत्वेपि न क्षतिः। नच
व्यभिचारित्वस्य प्रकारत्वे प्रतीन्द्रियघटिततया तत्संबंधेनेंधनत्वाव
च्छिन्नाभावोपि कथं लौकिकप्रत्यक्षगम्य इति वाच्यं। साध्याभाववद्वृत्ति
त्वियोग्यव्यक्तिवृत्तित्वरूपव्यभिचारितासंबंधेन तदभावस्य प्रत्यक्षसंभ
वादिति भावः। अयोग्योपाधिशंकयेति। साध्यव्यापकतया गृहीतस्य मनो

[redacted] विशेष

सामान्य

वाच्यत्वादिलक्षणायोग्य धर्मस्य व्यभिचारितासंबंधेन धूमादौ हेतौ शंक
येत्यर्थः। यद्वा साध्यव्यापकत्वरूपायोग्यधर्मप्रकारेण साध्यव्यापकीतध भ.२
र्मस्य व्यभिचारितासंबंधेन धूमादौ हेतौ शंकयेत्यर्थः। व्यभिचारसंशयादिति।
सर्वत्र हेतौ साध्यव्यभिचारसंशयादित्यर्थः। व्यभिचारसंशये व्याप्तिनिश्चय पं.४
स्यैवासंभवात्कथं तत्र व्याप्तिनिश्चयस्त्वमिति भावः। ननु भूयः साध्यसाधनस
हचारज्ञानस्य व्यभिचारज्ञानप्रतिबंधकतया तद्यत्रास्ति तत्रैव व्यभिचार
संशयासंभवेन व्याप्तिनिश्चयसंभव इत्यत आह। ज्ञातशंकेति। ज्ञातशंकः सहचे
रितत्वेन ज्ञातयोर्द्वयो[illegible]रपीत्यर्थः। तथा च भूयः सहचारज्ञानस्य व्यभिचार
ज्ञानप्रतिबंधकत्वमेवासिद्धमिति भावः। नन्वेवं वह्निसंनिकर्षपर्वतवि द्वि.१

उपलब्धेरिति। यथा पार्थिवत्वलोहलेख्यत्वयोर्हीरक इत्यर्थः। १२ [redacted]

शेष्यकवह्निप्रकारकसंस्काराद्यभावदशायामपि धूमदर्शनानन्तरं पर्वतो व
ह्निमानित्यादिशब्दप्रयोगोऽनुभूयते सकथंस्यात्तादृशशब्दप्रयोगं प्रति पर्व
तविशेष्यकवह्निप्रकारकबुद्धेर्हेतुत्वादित्यत आह। लोक इति। लोकानामि
त्यर्थः। धूमादीति। वह्नीन्द्रियसन्निकर्षं पर्वतविशेष्यकवह्निप्रकारकसंस्का
राद्यभावदशायामित्यादिः। वह्न्यादिव्यवहारः। पर्वतो वह्निमानित्यादिशब्द
प्रयोगः। केचित्तु वह्न्यादिव्यवहारः पर्वतविशेष्यकवह्निप्रकारकप्रवृत्ति
रित्याहुः। तदसत्। वह्निप्रकारिकापर्वते प्रवृत्तेर्हि साध्यतयोद्देश्यतयोपादा
नतया वा नाद्यो। वह्निमत्पर्वतस्य सिद्धत्वात्। नान्त्यः। उपादानगोचरलौकि
कसाक्षात्कारस्यैव प्रवृत्तिं प्रति हेतुतया व्यायनेयघनुमित्यात्मकज्ञाना

तदसंभवादिति मंतव्यं। संभावनेति। संभावना। पर्वतत्वव्याप्यसंसर्गाग्रहो वह्नेः
पर्वतस्य च ज्ञाने। न च लाघवाद्व्यवहारप्रवृत्ति विशिष्टधिय एव हेतुत्वं न तु
संसर्गाग्रहादेर्गौरवादिति वाच्यं। न ह्ययमसंसर्गाग्रहादेर्व्यवहारका
रणत्वं ब्रूमः किंतु तदुपलक्षितवह्न्यादिज्ञानादीनामेव कुर्वद्रूपत्वेन धर्म
विशेषेण [redacted]। अनंतानुमितिकल्पनापेक्षया कुर्वद्रूपत्वकल्पनाया ए
व लघुत्वादिति भावः। ननु धर्मदर्शनानंतरं वह्न्या दिव्यवहारजन
न कासंभवनात्तज्जनकीभूतज्ञानस्य वह्निमतिवह्निप्रकारकानुभवत्वेनानु
भवादिसत आहासंवादेनेति। संवादेना। संवादिव्यवहारजनकतादृग्रूप
साधारणधर्मदर्शनेन दोषे [redacted] पाच। प्रामाण्यं। वह्निमति वह्निप्रकारका

मू॰भा॰ पी॰ ३०

५ शब्दोपमानयोरप्यप्रमाणत्वं ३

१८ नुभवत्वं। अभिमानः पुनरगृहीतासंसर्गकं ज्ञानद्वयमेक [redacted] ज्ञानं वेत्यन्यदे
वृइति 18 तत्। उपसंहरति। इतीति। अतो हेतोः प्रत्यक्षातिरिक्तं न प्रमाणमिति शेषः। अ तथा च २
नुमानाप्रामाण्ये तेन घटपदं घटशक्तमसति वृत्त्यन्तरे वृद्धैस्तत्र प्रयुज्यमा
नत्वात् इत्यादिना प्रकारेणाशक्तिग्रह एव शब्दः प्रमाणं स्यादिति शब्दो न प्र
माणं शब्दस्याप्रामाण्ये तेनातिदेशवाक्यार्थज्ञानरूपोपमानं प्रमाणं स्यादि
त्युपमानमपि न प्रमाणमिति भावः। न च प्रत्यक्षातिरिक्तस्याप्रामाण्ये क
थमतीन्द्रियपदार्थसिद्धिरिति वाच्यम्। अतीन्द्रियपदार्थानभ्युपगमादिति भावः
ननु पक्षमोपसंहारविरोधः। येन रूपेण प्रतिज्ञा क्रियते तेनैव रूपेण निगम
नमपीति सकलकथकसंप्रदायसिद्धत्वात्। अत्र चानुमानं न प्रमाणमि

राम
१८

यस्योपक्रमस्तावन्नाप्रत्यक्षं प्रमाणमित्यस्य चोपसंहारस्यादिति चेत्तत्र अत्र मिश्राः

नाप्रत्यक्षं प्रमाणमित्यु [redacted] पक्रमस्त्वनुमानं न प्रमाणमित्यादिकं तु हेतुरिति प्राहुः नव्या

स्तु नाप्रत्यक्षं प्रमाणमित्यपि प्रतिज्ञान्तरं न त्वनुमानं न प्रमाणमित्यस्यो [redacted]

पसंहारस्तथा च यतोऽनुमानं न प्रमाणमतः प्रत्यक्षातिरिक्तौ शब्दोपमानम

पि न प्रमाणमित्यर्थ इत्याहुः। वस्तुतस्तु नाप्रत्यक्षं प्रमाणमित्यपि नोपसंहा

रोऽनुमानं न प्रमाणमित्यपि नोपक्रमः उपक्रमोपसंहारयोः प्रतिज्ञानिगम

४ नं नयोस्तैरंगीकारात्। किन्तु स्वरूपकीर्त्तनमात्रमित्येव तत्त्वं। अथानुमानस्या

२ प्रयो प्रामाण्यं केन प्रकारेण साध्यते किं प्रमाजनकतावच्छेदकरूपशून्यत्वलिंग

कानुमानेन किं वाऽनुमानं न प्रमाणमिति शब्देन तत्राद्य आह [redacted]

अप्रामाण्येति। अप्रमाणसाधर्म्येण। अप्रमाणत्वव्याप्येन प्रमाजनकताव

छेदकरूपमन्यत्वेन। दृष्टसाधर्म्यस्य। साधर्म्यदर्शनस्य। अप्रमाणात्व्याप्य
१९ दर्शनस्येति यावत्। अर्थे आह। एतद्वाक्यस्येति। अनुमानं न प्रमाणमिति वा
19 क्यस्येत्यर्थः। अर्थवत्त्वात् प्रयोजनवत्त्वात्। ननु स्वप्रतीत्यर्थः। तयोः संदेह
४ यविपर्ययोः। अयमर्थः। अनुमानं प्रमाणं न वेति संशयस्यानुमानं प्रमाण
५ सूत्रेण मेवेति विपर्ययस्य वा निरासे साधनत्वज्ञानाद्धि तद्वाक्यप्रयोगे प्रवृत्तिः। तवह
तच्च ज्ञानं कथं स्यात् परकीयसंशयविपर्यययोरप्रत्यक्षत्वादतोऽनुमानं प्र
माणमवश्यमुपेयमिति। प्रामाण्याप्रामाण्ययोरिति। प्रामाण्येऽप्रामा
ण्ये चेत्यर्थः। व्याघातात्। प्रत्यक्षातिरिक्तस्याप्रामाण्यव्याघातात्। प्रामा
ण्ये हि आयातं प्रत्यक्षातिरिक्तस्य शब्दस्य साक्षादेव प्रामाण्यं। अप्रामा
ण्ये चाप्रामाण्ये भ्रमजनकत्वमित्यनुमानेऽप्रामाण्यस्य भ्रम एव जननी

यः भ्रमत्वं च ज्ञानस्य विषयबाधाधीनमेवेत्यनुमानाप्रामाण्यं बाधाद
वेति भावः। ननु भ्रमजनकत्वलक्षणमप्रामाण्यं शाब्दस्य नोच्यते येन
भ्रमत्वस्य विषयबाधाधीनतया प्रत्यक्षातिरिक्तस्यानुमानस्याप्रामाण्य
स्वीकारापत्तिः। परंतु प्रमाकरणत्वव्यतिरेकलक्षणमित्यस्वरसादाह
अपि चेति। प्रत्यक्षस्यापि। अध्यक्षस्यापि। अप्रमाणत्वापत्तेरिति। प्रमा
त्वाभावापत्तेरित्यर्थः। प्रमात्वे प्रमाणाभावादिति भावः। कथं प्रमाणं ना
स्तितदाह। प्रामाण्यस्येति। प्रमात्वस्येत्यर्थः। ननु प्रत्यक्षेणास्य प्रमात्वं
स्वेनैव गृह्यत इति स्वयमेव स्व प्रमात्वे प्रमाणमतो न तत्रानुमानापेक्षे
त्यत आह। स्वत इति। न संशयेति। प्रमात्वसंशयेत्यर्थः। अयं घट इत्या
दिज्ञानानंतरं तृतीयक्षणे इदं प्रमा न वेति संशयो जायते भवन्मते

न्द०मा० रे३०

[redacted]

२० तन्न स्यात्त्वेनैव स्वप्रमा[redacted]स्यानिश्चितत्वादिति भावः। एतच्चापाततः। अयं घ
२० ट इत्यादि सविकल्पक[redacted] ज्ञानस्याहि तृतीयक्षणे प्रमात्वसंशयः। तेन
न३ तन्मयेऽपि स्वास्मिन्नप्रामाण्यं गृह्यते तस्यासन्मात्रविषयत्वेन प्रमात्वस्ये के३
के४ वतत्राभावात्। किं तु पारमार्थिकैव्यक्तिमात्रविषयकनिर्विकल्पक[redacted] ज्ञा
नमेव तन्मते प्रमा तेनैव स्वास्मिन्प्रामाण्यं स्वेन गृह्यते तत्र तत्तृतीयक्षणे हे५
[redacted] प्रामाण्यसंशयोऽस्तीत्यत्र। किं च तन्मते संशयप्रसक्तेऽपि कुर्वद्रूपत्वेनैवानि
४पि श्चयस्य प्रतिबन्धकत्वान्निश्चयसत्त्वे संशयोत्पत्तौ विरोधाभावः। कु[redacted]र्व
द्रूपत्वस्य फलबलकल्प्यत्वेन यदुत्तरं संशयो जायते तत्र तदभावाद्वा
स्तुतस्तु अनुमानस्याप्रामाण्ये निर्विकल्पक[redacted] ज्ञानस्यैवासद्विषय
कत्वे स्वप्रामाण्यावगाहित्वासिद्धेः कथं स्यात्। असद्विषयकत्वादिहेतुको राम २०

१ स्वविषयकत्व मात्र १

न्योन्याभाव ४ १ साधन १ त्वेति २

साध्याभावाधिकरणत्वमुपादेयं साध्यभेदेन कार्यकारणभावभेदात्तान्नवंत
थापि घटान्योन्याभावमात्रपटत्वादिसन्योन्याभावसाध्यकं घटत्वादिरूपेसा
ध्याभावेनसाध्यप्रतियोगित्वेनवासमवायादिसंबंधस्तदवच्छेदकत्वादात्म्यस्ये
वै वतदवच्छेदकत्वादिसव्याप्तिस्तदवस्थैतिवाच्यं अत्यंताभावाभावस्यप्रतियोगि
रूपत्वेनघटभेदस्यघटभेदात्यंताभावत्वावच्छिन्नाभावरूपस्यप्रतियोगिताव
च्छेदकीभूतघटत्वस्यापिसमवायसंबंधेनघटभेदप्रतियोगितावत्त्वान्नचान्यत्रा
त्यंताभावाभावस्यप्रतियोगिरूपत्वेनापि घटादिभेदात्यंताभावाभावोनघटादि
भेदरूपः किंतुप्रतियोगितावच्छेदकीभूतघटत्वात्यंताभावरूपएवेतिसिद्धो
तदूतिवाच्यं यथाहि घटत्वावच्छिन्न घटत्वत्वग्रहे घटात्यंताभावाऽग्रहात्घ
टात्यंताभावाभावव्यवहारात्तु घटात्यंताभावाभावो घटस्वरूपः तथा घटभेद

दि ३ था १

वत्वग्रहे घटभेदात्यंताभावाग्रहाद्घटभेदात्यंताभावाभावव्यवहाराच्च घटभेदए
२४ वत्तदत्यंताभावत्वावच्छिन्नप्रतियोगिताकाभाव इति तत्सिद्धांतो न युक्तिसहः
विनिगमकाभावेपि घटत्वत्वावच्छिन्नप्रतियोगिताकात्यंताभावत्व घटभे स्य
२५ दस्यापि घटभेदात्यंताभावाभावत्वसिद्धेरप्रत्यूहत्वाच्च। अतएव तादृशसि
द्धांतो नोपाध्यायसंमतः। अतएवाभावविरहात्मत्वं वस्तुनः प्रतियोगितेत्याचार्याः। अ
न्यथा घटभेदात्यंताभावप्रतियोगिनि घटभेदे तल्लक्षणाव्याप्त्यापत्तेः। अन्योन्याभाव
प्रतियोगितावच्छेदके तल्लक्षणस्यातिव्याप्त्यापत्तेः। न चैवं घटत्वत्वावच्छिन्नप्रतियो श्च
घट गिताकघटत्वात्यंताभावस्यापि भेदस्वरूपत्वापत्तिरिति वाच्यं। तदत्यंताभावत्वाव
च्छिन्नप्रतियोगिताकाभावस्यैव तत्स्वरूपत्वाभ्युपगमात्। तद्वत्वग्रहे तादृशभेदात्यं तद
ताभावाभावस्यैव व्यवहारात्। उपाध्यायैर्घटत्वत्वावच्छिन्नप्रतियोगिताकघटत्वा

(घटभेदात्यंताभावत्वावच्छिन्नाभावस्य घटभेदरूपत्वे आपत्तिरिति। घटत्वत्वस्यैव घटभेदात्यंताभा
वत्वरूपत्वादिति समभिमानः।)

यंताभावस्यापि घटभेदस्वरूपत्वाभ्युपगमात्। न चैवं साध्यसामान्यीयप्रतियोगि
तावच्छेदकसंबंधेनैव साध्याभावाधिकरणत्वं विवक्ष्यतां किं साध्यतावच्छेदकसं
बंधावच्छिन्नसाध्याभाववृत्ति तस्य प्रतियोगिताविशेषणत्वेनेति वाच्यं कालि
कसंबंधावच्छिन्नात्मत्वप्रकारकप्रमाविशेष्यत्वाभावस्य विशेषणताविशेषेण
साध्यत्वे आत्मत्वादिहेतावव्याप्त्यापत्तेः। कालिकसंबंधावच्छिन्न भावस्य साध्या
विशेषणताविशेषसंबंधेन योऽभावस्तस्यापि साध्यरूपतया कालिकसंबंध
वद्विशेषणताविशेषोपि साध्यीयप्रतियोगितावच्छेदकसंबंधस्तेन संबं
धेनात्मत्वप्रकारकप्रमाविशेष्यत्वरूपसाध्याभाववति आत्मनि हेतोरात्म
त्वस्य वृत्तेः। प्रतियोगितावच्छेदकत्वप्रतियोग्यपि अन्योन्याभावाभावः तेन
तादात्म्यसंबंधेन साध्यतायां साध्यतावच्छेदकसंबंधावच्छिन्नसाध्या

मू०मा०१३ (भेदाभावाभावघटित व्या० योगिरूपत्वेन) टी३७०

भाववृत्तिसाध्यीयप्रतियोगितस्य नाप्रसिद्धिः। इत्थं चाधेयताभावत्वं निरूपितत्वे
नापि साध्यसामान्यीयप्रतियोगिताविशेषणीया। अन्यथा घटान्योन्याभावव
त्वे न्यघटत्वादिसाध्यकेप्यापत्तेः। तादात्म्यस्य संबंधस्यापि साध्याभाववृत्तिसा विशेष्यक
ध्यीयप्रतियोगितावच्छेदकत्वात्। यद्वा साध्यतावच्छेदकसंबंधावच्छिन्नसा २५
ध्याभाववृत्तिसाध्यसामान्यीयानिरूपकप्रतियोगितावच्छेदकतान्यतरा
वच्छेदकसंबंधेनैव साध्याभावाधिकरणत्वं विवक्षणीयं। व्यस्तं तमन्यतर
विशेषणी। एवं च घटान्योन्याभाववान्यघटत्वादिसाध्यके साध्याभावस्य घटत्वा
देः साध्यप्रतियोगिकत्वविरहेपि न क्षतिः। ताद्रृशान्यतरस्य प्रतियोगिता
वच्छेदकत्वस्यैव तत्र त्त्वसत्त्वात्। न च तथापि कपिसंयोगी एतद्वृक्षत्वादित्याद्य
व्याप्यवृत्तिसाध्यकसद्धेताव्याप्तिरिति वाच्यं। निरुक्तसाध्याभाववत्ताविशि राम

२५

त्वनिरूपितायानिरूपकसंबंधसंसर्गकानिरवच्छिन्नाधिकरणतातदाश्रयाद
१ स्य तितत्वविवक्षितत्वात्गुणकर्मान्यत्वविशिष्टसत्ताभाववान्गुणत्वादित्यादौस
त्ताभावकसाध्याभावाधिकरणत्वस्यगुणादिवृत्तित्वेपिसाध्याभावत्वविशिष्ट
निरूपिताधिकरणत्वस्यगुणाद्यवृत्तित्वेनाव्याप्तेः। नचैवंकपिसंयोगाभा
ववान्सत्वादित्यादौनिरवच्छिन्नसाध्याभावाधिकरणत्वाप्रसिद्ध्याऽव्याप्तिरि
तिवाच्यं। केवलान्वयिन्यभावादिसन्नेनग्रंथकृतेवास्याद्वोपस्यवक्ष्यमा
णत्वात्। नचतथापिकपिसंयोगिभिन्नगुणत्वादित्यादौनिरवच्छिन्नसाध्या
भावाधिकरणत्वाप्रसिद्ध्याऽव्याप्तिः अन्योन्याभावस्यव्याप्यवृत्तित्वनियम
२ तस्य वादिनयेकेवलान्वय्यप्यनंर्गततत्वादितिवाच्यं। अन्योन्याभावस्यव्याप्यवृत्ति
त्वनियमवादिनयेऽन्योन्याभावांतराभावस्यप्रतियोगितावच्छेदकस्वरूप

यं व्याप्यवृत्तिमदन्योन्याभावस्येत्यर्थः

श्री२

तेष्वप्याप्यवृत्तिमदन्योन्याभावाभावस्य व्याप्यवृत्तिस्वरूपस्यातिरिक्तस्या
२६ भ्युपगमात् तदंशे स्फुटीभविष्यति। ननु तथापि समवायादिना गगनादिहेतु
२५ के इदं वह्निमद्गगनादित्यादावतिव्याप्तिः। वह्न्यभाववति हेतुतावच्छेदकसमवायादि
संबंधेन गगनादेरवृत्तेः। न च तल्लक्ष्यमेव हेतुतावच्छेदकसंबंधेन पक्षधर्मत्वाभावाच्चास
द्धेतुत्वव्यवहार इति वाच्यं। तत्रापि व्याप्तिभ्रमेणेवानुमितेरनुभवसिद्धत्वात्। अन्यथा धूमवा क
व न्वह्नेरित्यादेरपि लक्ष्यत्वस्य सुवचत्वात्। एवं द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादावप्यव्या
प्तिः विशिष्टसत्त्वस्य केवलसत्तानतिरेकितया द्रव्यत्वाभाववत्यपि गुणादौ तस्य वृत्तेः। गुणे गुण
द्र कर्मान्यत्वविशिष्टसत्त्वोति प्रतीतेः सर्वसिद्धत्वात्। सत्तावान् द्रव्यत्वादित्यादावव्याप्तिश्च।
दि सत्ताभाववति सामान्यादौ हेतुतावच्छेदकसमवायसंबंधेन वृत्तेरप्रसिद्धेरिति चेन्न। हेतु
तावच्छेदकावच्छिन्नहेत्वधिकरणताप्रतियोगिकहेतुतावच्छेदकसंबंधावच्छिन्नाधेयतानिरू
पितविशेषणताविशेषसंबंधेन निरुक्तसाध्याभाववद्विशिष्टनिरूपितनिरुक्तसंसर्गक

संबंध १

निरवच्छिन्नाधिकरणताश्रयवृत्तिसामान्याभावस्य विवक्षितत्वात्। वृत्तिश्च न हेतुतावच्छेद
कसंबंधेन विवक्षणीया। अस्ति च सत्तावान् द्रव्यत्वादित्यादौ सत्ताभावाधिकरणतावद्वृत्तित्वस्य
हेतुतावच्छेदकसमवायसंबंधावच्छिन्नाधेयतानिरूपितविशेषणताविशेषसंबंधेन सा
मान्याभावो द्रव्यत्वादौ समवायसंबंधावच्छिन्नाधेयतानिरूपितविशेषणताविशेषसं
बंधावच्छिन्नप्रतियोगिताकसत्ताभावाधिकरणतावद्वृत्तित्वाभावस्य व्यधिकरण
संबंधावच्छिन्नाभावतया संयोगसंबंधावच्छिन्नगुणाभावादेरिव केवलान्वयित्वात्।
च द्रव्यं सत्त्वादित्यादौ द्रव्यत्वाभावाधिकरणगुणादिवृत्तित्वस्यैव समवायसंबंधावच्छिन्ना दि
विशेष धेयतानिरूपितविशेषणतासंबंधेन सत्तायां सत्वाभ्रान्ति व्याप्तिः। द्रव्यं विशिष्टसत्त्वादित्या
दावव्याप्तिवारणाय प्रतियोगितावच्छेदकांतमाधेयताविशेषणं। वस्तुतस्तु एतल्लक्षणकर्तृ
नये विशिष्टसत्वे विशिष्टानिरूपिताधारतासंबंधेनैव द्रव्यत्वव्याप्यं न तु समवायसंबंधेन।
तथा च प्रतियोगितावच्छेदकांतमाधेयताविशेषणमनुपादेयमेव तदनुपपादाने हेतुतावच्छेद

मू॰ मा॰ २ ननु उभयत्वं उभयत्रैव पर्याप्तं न त्वेकत्रेति सिद्धांतादरे घटत्ववान् घटपटोभयत्वादित्यादौ पर्याप्तिसंबंधेन उभय
=तथापि ११ त्वहेतुके ऽतिव्याप्तिः। घटत्वाभाववति पटे पर्याप्तिसंबंधेन हेतोरवृत्तेः घटो न घटपटोभयमिति प्रतीतिविरहेण अ॰
टेन घटे पटोभयमिति प्रतीतेरिति चेन्न। तादृशसिद्धांतादरे हेतुतावच्छेदकसंबंधेनैव साध्यसामानाधिकरण्ये
त्वेन घटत्वतदभाववदु हेतुतावच्छेदक २ त्वतदभाववदुभयात्तौ तदा ३
क्रमभेदेन कार्यकारणभावभेदापत्तेः हेतुतावच्छेदकसंबंधेन संबंधित्वेसतीत्यनेनापि विशेष णत्वे
णाद्वह्निमान् गगनादित्यादौ नातिव्याप्तिः। केचित्तु निरुक्तसाध्याभावविशिष्टनिरूपितताया त्व
२७ विशेषणता विशेषसंबंधेन यथोक्तसंबंधेन वा निरवच्छिन्नाधिकरणताश्रयवृत्तेर्यत्सामा न्यत्व
२७ नं हेतुतावच्छेदकसंबंधावच्छिन्नयद्धर्मावच्छिन्नाधिकरणता त्वं तद्धर्मवत्त्वं विवक्षितं। धूम
वान्वह्नेरित्यादौ पर्वतादिनिष्ठवह्न्यधिकरणतायाः धूमाभावाधिकरणावृत्तित्वेपि अयो
ता॰ गोलकनिरवच्छिन्नाधिकरणताया वृत्तेरतथात्वान्नाव्याप्तिरित्याहुः। अन्ये तु हेतुतावच्छेदकसं ति॰
बंधावच्छिन्नहेतुतावच्छेदकावच्छिन्नस्वाधिकरणताश्रयवृत्तियन्निरवच्छिन्नाधिकरणात्वं
तद्वृत्तिनिरुक्तसाध्याभावविशिष्टनिरूपितयथोक्तसंबंधावच्छिन्नाधिकरणतात्वमि त्व॰
ति विशेषणाविशेष्यभावव्यत्यासेतात्पर्यं। स्वपदं हेतुपरं। इत्थं च कपिसंयोगाभाववान् स
त्त्वात् कपिसंयोगी भिन्नं गुणत्वादित्यादौ अपि नाव्याप्तिरित्याहुरिति संक्षेपः॥ ७॥ लक्षणांत
रमाह। साध्यवद्भिन्नेति। साध्यवद्भिन्नो यः साध्याभाववान् तदवृत्तित्वमित्यर्थः। कपिसंयोगी
× सतीत्यनेनैव वारणीयत्वादिति। अत एवाकिंचित्करविशेषणतो वारयति समत्वं साध्यसमानाधिकरणत्वं वेति केव राम
लान्वयिग्रंथे दीधितिकृता॥ २ × २७
विशेष २

साध्यवद्भिन्नसाध्याभावः ३

एतद्वृक्षत्वादिग्राह्यव्याप्यवृत्तिसाध्यकाव्याप्तिवारणाय साध्यवद्भिन्नेति साध्याभाववतो विशे
षणमिति प्राञ्चः। तदसत्। साध्याभाववदादिपदस्य व्यर्थत्वापत्तेः साध्यवद्भिन्नावृत्तित्वमित्यस्यैव
सम्यक्त्वात्। न चास्तु साध्यवद्भिन्ने यः साध्याभावः तद्वदवृत्तित्वमिति सप्तमीतत्पुरुषोत्तरं मतुप्
प्रत्ययः। तथा च साध्यवद्भिन्नवृत्तिर्यः साध्याभावस्तद्वदवृत्तित्वमित्यर्थः। एवं च साध्यवद्भिन्न
वृत्तीत्यनुक्तौ संयोगी द्रव्यत्वादित्यादौ अव्याप्तिः संयोगाभाववति द्रव्ये द्रव्यत्वस्य वृत्तेः तदु
पादाने च संयोगवद्भिन्नवृत्तिसंयोगाभावो गुणादिवृत्तिसंयोगाभाव एव अधिकरणभे
देनाभावभेदात् तद्वदवृत्तित्वान्नाव्याप्तिः। न च तथापि साध्यवद्भिन्नावृत्तित्वमित्येवास्तु किं
साध्याभाववदित्यनेनेति वाच्यम्। यथोक्तलक्षणे तस्याप्रवेशे तु वैयर्थ्याभावात् तस्या
पि लक्षणान्तरत्वात्। न च तथापि साध्यवद्भिन्नवृत्तिर्यस्तद्वदवृत्तित्वमेवास्तु किं साध्याभा

हेतोः वपदेनेति वाच्यम्। तादृशद्रव्यत्वादिमद्वृत्तित्वादसंभवापत्तेः साध्याभावे यत्र साध्यपदमप्य
तएव द्रव्यत्वादेरपि द्रव्यत्वाभावाभावत्वात् एवरूपाभावस्यैवाधिकरणभेदेन भेदाभावात्।
ननु तथापि घटान्यान्यासंयोगी घटत्वान्यतराभाववान् गगनत्वादित्यत्र घटानधिकरण

घटत्व १

व्याप्ति ३

देशावच्छेदेन घटाकाशसंयोगाभावस्य गगने सत्वात् सद्धेतुतया व्याप्तिः साध्यवद्भिन्ने घटेव 28
र्तमानस्य साध्याभावस्य घटाकाशसंयोगरूपस्य गगने सत्वात् तत्र चैहेतोर्वृत्तेः। न च साध्य पि
२८ वद्भिन्नवृत्तित्वविशिष्टसाध्याभाववत्वं विवक्षितमिति वाच्यं। साध्याभावपदवैयर्थ्यापत्तेः सा
२ ध्यवद्भिन्नवृत्तित्वविशिष्टवृत्तित्वस्यैवसम्यक्त्वादिति चेन्न। अभावाभावत्वस्यातिरिक्तत्वम
तेनैवैतल्लक्षणकरणात् तथा च अधिकरणभेदेनाभावभेदात् साध्यवद्भिन्ने घटे वर्त्तमा
नस्य साध्याभावस्य प्रतियोगिव्यधिकरणस्य प्रतियोगिमति गगने सत्वादव्याप्तेरभावात्।
भावे न चैवं साध्याभाव यत्र साध्यपदवैयर्थ्यं अभावाभावस्य प्रतिरिक्तत्वेन द्रव्यत्वादेरभावत्वा
भावात् साध्यवद्भिन्नवृत्तिघटाभावादेस्तद्धेतुमयसत्वात् अधिकरणभेदेनाभावभेदा
दिति वाच्यं। यत्र प्रतियोगिसमानाधिकरणत्वप्रतियोगिव्यधिकरणत्वलक्षणाविरुद्धध
र्मोध्यासस्तत्रैवाधिकरणभेदेनाभावभेदाभ्युपगमो ननु सर्वत्र तथा च साध्यवद्भिन्न
ति वृत्तिघटाभावादेर्हेतुमत्यपि सत्वात् असंभववारणाय साध्यपदोपदानात्। यद्वा घटा
काशसंयोगे घटसौन्यतराभावो अतिरिक्त आकाशसंयोगघटत्वादीनामननुगत राम

भावा

कपि–

मेदाभावभानानुपपत्तेरितिसंयोगवद्भिन्नत्वाभावस्यापिनिरवच्छिन्नवृत्तिमत्वा
त्वावच्छिन्नतस्येसकलपदमशेषपरंनत्वनेकपरंएतद्घटत्वाभावस्यपटत्वो
घे दिसंयोगव्याप्तिविपक्षकेसाध्याभावाधिकरणस्ययावत्वप्रसिद्ध्याअव्याप्त्या
न पत्तेः।तथाचकिंचिदवच्छिन्नयानिरूपितसाध्याभावाधिकरणतायाव्यापकी
मतोयोभावःहेतुतावच्छेदकसंबंधावच्छिन्नतत्प्रतियोगितानवच्छेदकहेतुता दि
वच्छेदकवत्वंलक्षणार्थः।नचसत्तादिसामान्याभावस्यापिप्रमेयत्वेनानिरू
त्तसाध्याभावाधिकरणताव्यापकत्वात्द्रव्यंसत्वादित्यादावतिव्याप्तिः।त
द्वात्रिसन्योन्याभावप्रतियोगितानवच्छेदकत्वंव्यापकत्वमित्युक्तौतुनिर्धू
मत्वान्निर्धूमवह्नित्वादिसाधावव्याप्तिःनिर्धूमवह्नित्वाभावान्नोवह्निव्यक्तौनास
वैसौमेवचालनीन्यायेननिर्धूमत्वाभावाधिकरणतावद्वह्न्योन्याभावप्र त्रिश
तियोगितानवच्छेदकत्वाभावादितिनाव्याप्तिः।नाहदशाधिकरणताव्यापक

य

तावच्छेदकं हेतुतावच्छेदकसंबंधावच्छिन्नयद्धर्मावच्छिन्नाभाववत्त्वं तद्धर्मवत्त्वस्य विव
अत्वं क्षितत्वात् व्यापकतावच्छेदकं तु तद्धर्मविशिष्टसंताभावप्रतियोगितानवच्छेदकत्वं न
तु तद्धर्मविशिष्टप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वं तद्वति निरव
३१ च्छिन्नवृत्तिमान् यो भावस्तत्प्रतियोगितानवच्छेदकत्वं वा प्रकृतव्यापकतायां प्र
तियोगिवैयधिकरण्यस्य निरवच्छिन्नत्वस्य वा प्रवेशे प्रयोजनाविरहात् तेन पृ
कपि थिवीसंयोगादिसाध्यके नानातिव्याप्तिः। संयोगाभावत्वस्य निरुक्तव्यापकतावच्छेद
कत्वविरहादित्येव परमार्थः ॥ ७ ॥ साध्यवदन्येति । अत्रापि प्रथमलक्षणोक्तरी
त्या हेतौ साध्यवदन्यवृत्तित्वाभाव इत्यर्थः। तादृशवृत्तित्वाभावः तादृशवृत्तित्वसा श्व
मान्याभावो बोध्यः। तेन धूमवान् वह्नेरित्यादौ धूमवदन्यजलह्रदादिवृत्तित्वाभा
वस्य धूमवदन्यवृत्तित्वजलत्वोभयाभावस्य च हेतौ सत्त्वेपि नातिव्याप्तिः। साध्यव
दन्यत्वं चान्योन्याभावत्वनिरूपितसाध्यवत्त्वावच्छिन्नप्रतियोगिताकाभाववत्त्वं। तेन
वह्निमान् धूमादित्यादौ तत्तद्वह्निमदन्यस्मिन् धूमादेर्वृत्तावपि नाव्याप्तिः। न वा वह्नि राम

मत्वावच्छिन्नप्रतियोगिताकासंताभावस्यस्वावच्छिन्नभिन्न [redacted] भेदरूपस्याधिकर
णोपर्वताद्दौधूमस्यवृत्तावपिनाव्याप्तिः। तस्य साध्यवत्त्वावच्छिन्नप्रतियोगितायाऽत्यं
ताभावत्वनिरूपितत्वेन अन्योन्याभावत्वनिरूपितत्वविरहात्। अन्योन्याभावेनिरूपि त्व
तत्वंच तादात्म्यसंबंधावच्छिन्नत्वमेव। साध्यवत्त्वंच साध्यतावच्छेदकसंबंधेन बोध्यं।
म तेनच्यैव वह्निमान् धूमादित्यादौ वह्नित्वावच्छिन्नप्रतियोगिताकसंसंबंधेन वह्निम समवाये५
तोऽन्योन्याभावस्याधिकरणे पर्वतादौ धूमादेर्वृत्तावपि नाव्याप्तिः। सर्वमन्यत्प्र
धे थमलक्षणोक्तदिशा अवसेयं॥ ५॥ [redacted] यथाचनतृतीयलक्षणाभेदः द्वि
तथोक्तं तत्रैवेतिसमासः। सर्वाण्येवलक्षणानि केवलान्वयिन्यव्याप्त्यादूषय
न्ति। केवलान्वयिन्यभावादिति। पंचानामेवलक्षणानामिदंवाच्यं ज्ञेयत्वादि
साध्यकव्याप्यवृत्तिकेवलान्वयिसाध्यके द्वितीयादिलक्षणचतुष्टयं नु कपिसं स्यर
योगाभावान् स साध्यं दित्यादौ व्याप्यवृत्तिकेवलान्वयिसाध्यकेपि भावादित्यर्थः।
वं दावन् वौ

॥ ५८ ॥

वच्छिन्नावच्छेदकताकत्व ती ४सत्वं साध्या

साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताक[redacted]
३२ भावस्य साध्यतावच्छेदकसंबंधेन साध्यवद्[redacted]वच्छिन्नप्रतियोगिताकान्योन्या
भावस्य चाप्रसिद्धत्वात्। कपिसंयोगाभाववान् सत्वादित्यादौ निरवच्छिन्नसाध्याभावा
३२ स्य धिकरणत्वस्याप्रसिद्धत्वाच्चेति भावः। तृतीयलक्षणे केवलान्वयि साध्यका[redacted] चेत कपिसंयो गमनं४
धारव्यानावसरे एवं प्रपंचितं। एतच्चोपलक्षणं द्वितीये कपिसंयोगी एतद्वृक्षत्वादित्या
दाव व्याप्तिः। अधिकरणभेदेनाभावभेदमानाभावेन कपिसंयोगवद्भिन्नवृत्तिः कपि
संयोगाभावो द्रव्यवृत्तिः कपिसंयोगाभावोऽपि एक एव तद्वृत्तित्वादेतद्वृक्षत्वस्यान
च साध्यवद्भिन्नवृत्तित्वाविशिष्टसाध्याभाववद्वृत्तित्वं वक्तव्यमेवं च एतस्यावृत्ति
भावा त्वाधिकरणीभूताभावाभावाव्याप्तिरितिवाच्यो साध्याभावपदवैयर्थ्यापत्तेः साध्यव
द्भिन्नवृत्तित्वविशिष्ट एव दव्यमिति तस्यैव सम्यक्त्वात् सद्धेतौ हेत्वधिकरणवृत्तित्वाधि भावा
करणत्वाभावादेवासंभवाभावात्। तृतीये साध्यवत्प्रतियोगिकान्योन्याभावमात्र राम

ता३ ३२

वं। संयोगी घटत्वे चालनीन्याये नान्योन्याभावमादाय नानाधिकरणसाध्यके वह्नि
मान् धूमादित्यादावव्याप्तिश्रयेऽपि बोध्यं॥ नापीति। अत्र साध्ये स्वासमानाधिक
रणत्वं न साध्याधिकरणावृत्तित्वाभावः द्रव्यं सत्त्वादित्यादावतिव्याप्तेः द्रव्यत्वाधिकरण व्याप्तेः
वृत्तित्वाभावानधिकरणत्वात्सत्तायाः नापि साध्यवद्भिन्नवृत्तित्वं द्वितीयेऽपि नरूपा स्य
पत्तेः किन्तु साध्याधिकरणवृत्तित्वाभाववन्न वृत्तित्वमिति तदनधिकरणत्वं च तद्वद्भिन्न
स्य अधिकरणत्वं प्रवेशे प्रयोजनविरहात् तथाच साध्याधिकरणवृत्तित्वाभाववद्वृत्तिभि
र्थः न्नत्वं हेतोरव्यभिचारित्वमिति फलितं अव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिवार
णाय अधिकरणत्वप्रवेशः। अव्याप्यवृत्तेरधिकरणानां तु नाव्याप्यवृत्तिः साध्या
धिकरणत्वं च साध्यतावच्छेदकावच्छिन्नं साध्यतावच्छेदकसंबन्धावच्छिन्नं च
२सत्ता ग्राह्यं। अन्यथा गुणकर्मान्यत्वविशिष्टसत्त्वान् जातेरित्यादौ सत्ताया एव साध्यत्वेन
साध्याधिकरणीभाववत्सामान्यादेवतद्वृत्तित्वात् जातेरतिव्याप्तिः स्यात् स्याच्च

समवायेनवह्न्यादौसाध्यसंयोगेनधूमादिहेतावतिव्याप्तिः। वन्ह्यधिकरणत्वाभाववज्ज
३३ लह्रदादावेवतद्वृत्तित्वाद्धूमादेः इत्थंचसाध्यतावच्छेदकसमवायसंबंधावच्छिन्नवह्न्य
३३ धिकरणत्वाभाववत्त्ववृत्तावपिधूमस्यतद्वृत्तित्वाभावात्व्याप्तिः वृत्ति [redacted] हेतुतावच्छे
दकसंबंधेनबोध्या। तेनतादृशवह्न्यधिकरणत्वाभाववतिधूमावयवेसमवायेनधूम
स्यवृत्तावपिनक्षतिः। नचैवंसत्तावान्द्रव्यत्वादित्यादावव्याप्तिः सत्ताधिकरणत्वाभा
६ समवाय ववतिसामान्यादौहेतुतावच्छेदकसंबंधेनवृत्त्यप्रसिद्धेरितिवाच्यं। तादृशसाध्या २
धिकरणत्वाभावव्यापकान्योन्याभावप्रतियोगितावच्छेदकत्वमितिविवक्षितत्वात्। सा
ध्याधिकरणत्वाभावसमानाधिकरणोयुक्तो धूमवान्वह्नेरित्यादौ धूमाधिकरण
६ त्वाभाववतिजलह्रदादौवह्निमदन्योन्याभावसत्त्वादतिव्याप्तिरितिव्यापकत्वानुधाव
च नं। अन्योन्याभावप्रतियोगितावच्छेदकत्वं हेतुतावच्छेदकसंबंधावच्छिन्नं हेतुतावच्छे
दकावच्छिन्नंचग्राह्यं। अन्यथावह्निमान्धूमादित्यादौवह्न्यधिकरणत्वाभाववतिधूमा
वयवेधूमवदन्योन्याभावासत्त्वादव्याप्तिःस्यात्स्याच्चद्रव्यंजातेरित्यादौघटत्वप राम

३३

रूप

टत्वादिनैत्तत्त्वाद्‍ तिमतोअन्योन्याभावस्यद्रव्यत्वाधिकरणताभावव्यापकत्वेनातिव्या
प्तिः। अव्याप्यवृत्तिमतोऽन्योन्याभावस्तुनाव्याप्यवृत्तिरिति पृथिवीसंयोगादिसाध्यव्याप्य
वृत्तिहेतुके व्यभिचारिणि नातिव्याप्तिरिति संक्षेपः। साध्यवैयधिकरण्येति। साध्यवै
यधिकरण्यं साध्यवद्भिन्नवृत्तित्वं साध्यवदवृत्तित्व पर्यवसितं द्रव्यं सत्तादित्यादावति व्याप्तिः जातेरि
अव्याप्यवृत्तिमतोऽन्योन्याभावस्तुनाव्याप्यवृत्तिरिस व्याप्यवृत्तिसाध्यकसद्धेतौ नाव्या
प्तिः। अनधिकरणतामिसत्त्राधिकरणतांशस्याधिकस्य प्रवेशान्न साध्यवदन्यावृत्तित्व
मित्युक्तेन यथाश्रुतस्य पौनरुक्त्यं अखंडाभावेतयात्वाधिकरणतांशस्यनवैयर्थ्यं साध्य घटक न
वद्भिन्नत्वं च साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिता
वच्छेदकताकं बोध्यं। तेन वन्हिमान् धूमादित्यादौ धूमस्य समवायेन वान्हिमतो भिन्ने यत्
किंचित्साध्यवद्भिन्ने पर्वतादौ वृत्तित्वेपि नक्षतिः। तादृशसाध्यवद्भिन्नत्वव्यापकान्
न्योन्याभावप्रतियोगितावच्छेदकत्वामिति तु समुदायार्थनिष्कर्षः। अन्यथा पर्वतसाध्य

भेदवत्वं २ व्याप्तिः।२

११५ ... तदुभयमपि । तदुभयलक्षणाद्वयमपि । साध्यानधिकरणानधिकरणत्वं साध्यानधिकरणानधिकरणत्वसामान्याभाववद्वृत्तित्वाभाववत्साध्यवत्सामान्याभिन्नवृत्तित्वाभावाद्यन्यतरबोधजनकमिति यावत् ... इतराभाव
... तत्र ... साध्यके ... प्रसिद्धमित्यन्वयः । साध्यानधिकरणत्वसामान्याभावादेरप्रसिद्धत्वादिति भावः । ननु तदुभयवोधानानि

करणानधि

वह्निमद्वृत्तिकेत्वमित्यत्र रोते हेतुतावच्छेदकसंबंधेनैव व्याप्त [illegible] तावान्द्रव्य
त्वादिसाधाद्रव्याप्यापत्तेः शेषं पूर्ववत् । लक्षणद्वयमेकदेवद्दूषयति तदुभयमपीति ।
साध्यो ऽधिकरणानधिकरणात्वे । साध्यानधिकरणत्वनियतं साध्यानधिकरणा रत्ति
त्वव्याप्यमिति यावत् तच्च व्यापकीभूतं साध्यानधिकरणा रत्तित्वं च तन्नाकेवलान्व
यिसाध्यके ऽसिद्धमित्यन्वयः साध्यानधिकरणत्वस्य साध्याधिकरणतावच्छिन्नप्र
तियोगिताकभेदवत्त्वस्य तत्रासि द्धेः । यदि च साध्यानधिकरणत्वं न तत्सामान्यभेदः
किंतु साध्याधिकरणप्रतियोगितो कभेदवत्त्वमात्रं । तदा वह्निमान्धूमादित्यत्र यत
एव किंचिद्वह्न्यनधिकरणे पर्वतादौ वर्त्तमाने धूमेऽप्यसिद्धमित्यर्थः । अप्यर्थे च का
राकेवलान्वयिसमुच्चयः । तथा च व्यापकाभावाद्व्याप्यीभूतं तदुभयलक्षणमपि
पि तदुभयत्रासिद्धमिति भावः । साध्यानधिकरणानधिकरणत्वमितीयथाश्रु
तं तु न संगच्छते । यथोक्तलक्षणद्वयस्य तत्स्वरूपत्वाभावादिति ध्येयं । व्यधिकर

५२

णाधर्मावछिन्नप्रतियोगिताकाभाववादि ऽन्यथाख्यातिस्वीकारिणः सौंदर्यस्य म
तमादाय साध्याप्रसिद्धाभाववदवृत्ति समिति प्रथमलक्षणे केवलान्वयिन्यव्याप्ति
मुद्धरति। अथेति। समवायितयेति। समवायित्वादिरूपेणावाच्यत्वा वृत्तिधर्मेण
सर्थः। आदिपदात् समवेतत्व घटत्व पटत्वादेर्वा च्यत्वा वृत्तिधर्मत्वेनस्य परिग्रहः। घ मा
ट एव प्रसिद्ध इति एवकारो व्यर्थः घटेऽपि प्रसिद्धेः सर्थः। अन्यथा तादृशाभावस्य ३
पदार्थमात्रे प्रसिद्धत्वादवधारणासंगतेः। ननु प्रतियोगिना समम भावस्य विरोधात्वा
द्वाच्यत्ववति घटे कथं तदभावइत्यत आह। व्यधिकरणधर्मावछिन्नाभावे स्वेति।
स्वाधिकरणावृत्ति धर्मावछिन्नप्रतियोगिताकाभावस्येत्यर्थः। स्वपदं प्रति
योगितापरं केवलान्वयित्वात् सर्वत्र सत्वात् प्रतियोगिमत्यप्रतियोगिमति च स
सत्वादिति यावत् अभावस्य हि प्रतियोगितावच्छेदकावछिन्नप्रतियोगिनैव स
मं विरोधो ननु प्रतियोगिमात्रेणाव्यधिकरणधर्मावछिन्नप्रतियोगीवन

घाचिदप्यं अप्रसिद्धत्वादतः सर्वत्रैवैतदवच्छिन्नाभावः नचवाच्यत्वमीश्वरेच्छातत्र
चगुणत्वेच्छात्वादिसमवायित्वभगवदा[redacted]समसमवेतत्वयोः सत्वेनसमवायित्वंस
34 मवेतत्वं[redacted]वाकुतोवाच्यत्वनिष्ठप्रतियोगिताव्यधिकरणमितिवाच्यं। वाच्यत्वं
35 नेश्वरेच्छामात्रं किंतुतद्विषयकत्वाभियुक्तैरुपगमादितिभावः। समवायितयस्य
प्प घटादिसमवायितयासर्वत्रसत्त्वे। यद्यपिसमवायितादि[redacted]नाव्याधिकरणधर्मेण
वाच्यताभावस्याप्रसिद्धावपितत्तत्साध्यव्यक्त्यभाव[redacted]विशिष्टाभावोभयाभावा
दिकमादायासंभववारणायसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्या त
भावस्यैवलक्षणाघटकत्वात्तादृशाभावस्यचवाच्यत्वादिसाध्यकेऽप्रसिद्धत्वाद्व्या मै३
प्तिर्दुर्वारैव। नचसाध्यसामान्यप्रतियोगिताकाभावमात्रंलक्षणाघटकमिति[redacted]
[redacted]णयमाशंक्येतिवाच्यं। तथासतिविशिष्टाभावोभयाभावादिरूपंसमानाधि
रणाधर्मावच्छिन्नाभावमादायैवप्रसिद्धिसंभवेनव्यधिकरणधर्मावच्छिन्नप्र
इत्यभिप्राये राम

त्तियोगिताकाभावपर्य्यंतानुधावनवैफल्यात् नचवैशिष्ट्यव्यासज्यवृत्तिधर्मानव
च्छिन्नप्रतियोगिताकसाध्याभावमात्रंलक्षणाघटकमितिभ्रमेणो[?]यंशंकेति मार २
वाच्यं दंडेवत्त्वावच्छिन्नपुरुषाभावस्येवसमवायित्वावच्छिन्नवाच्यत्वाभावस्या
समवाय पिविशिष्टाभावत्वात्समवायित्वादिवैशिष्ट्यस्यावच्छेदकीभूतधर्मघटकत्वा योग
त् तथापिसाध्याभावपदेनसाध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेद
तदा पर्वतीयवह्नित्वेन न पर्वतीयवह्नेर्भानं अनुमित्यां पक्षतावच्छेदकप्रकारकत्व
नियमात् अपितु वह्नित्वरूपेण पर्वतीयवह्निमात्रभानं तद्धर्मावच्छिन्नेतरबाधज्ञान
स्याभिन्नप्रकारकत्वेऽपि सामान्यरूपेण तद्धर्मावच्छिन्नेतरविधेयकानुमितित्वावच्छिन्नं
प्रति अतिरिक्तप्रतिबंधकत्वकल्पनादिति। प्राचीनमतमभिप्रेत्यैव दूषणमित्याहुः।
तादृशप्राचीनमतविचारश्चास्मत्कृत[illegible]सिद्धांतरहस्येऽनुसंधेयः। इदं सर्वमवधेयं ना

करत्वात्

दृशानुमितिषु महानसीयवह्न्यादेरसाध्यतयाऽमिशपातैं सुवचतयामूले उक्तमिदमं [redacted] भव
संगतमित्यादिकं ॥ तटस्थशंकृते । नचेति । सा[redacted]मान्यतः व्याप्तिपदं नान्यतमप्रकारेणाप
रस्य । नन्वनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिरिति जिज्ञासो परस्य दूषणेन अव्याप्याद्यदिदू उक्ताए
षणेनासाधकत्वं अनुमितिप्रयोजकता उक्ता व्याप्तिर्नानुमितिशेषः । तथा च किं व्याप्ति
निरूपणेनेति भावः । स्वार्थेति । स्वास्मिन् स्वीयत्विष्यादौ अर्थः प्रयोजनं यस्य एतादृशं यद
नुमानं त्विष्यादेर्व्याप्तिज्ञानमिति यावत् । तदुपयोगि यदिदं व्याप्तिस्वरूपनिरूपणं त
द्विनेत्यर्थः । कथायामिति । स्वीयस्य त्विष्यादेरित्यादिकथाविचारः । अप्रवेशात् । अप्रवे
शासंभवात् । व्याप्तिनिरूपणं विना त्विष्यादेर्व्याप्तिज्ञानासंभवेन सद्धेतुत्वासद्धे
तुत्वपरिचयस्यैव अशक्यतया हेतूदाहरणप्रयोगस्यैवासंभवादित्यर्थः । तथा च
न केवलं सिद्धिपरप्रश्नसमाधित्सया व्याप्तिनिरूपणं अपितु त्विष्याणां व्याप्तिस्व
रूपनिरूपणं विना कथायां प्रवेशो न संभवतीति सैतदर्थमपीति भावः । व्याप्तिवादपूर्व

भितर ज्ञानं केन

५९ पूर्वपक्षरहस्य॥ धूमस्साध्या नाम॥ प्रतियोग्यसमानाधिकरण्येति॥ यत्सदंहेतुमिन्तपरं॥ हिती
यम्यं यत्सदं साध्यतावच्छेदकपरं॥ प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितानवच्छेदकस्वरूपं यन्न
५९ भवति तेन समं सामानाधिकरण्यं॥ तदवच्छिन्नेन समं सामानाधिकरण्यं तस्य हेतोर्व्याप्तिरिति यो
जना॥ तद्धर्मावच्छिन्नेन सह तस्य हेतोर्व्याप्तिरित्यर्थः॥ भवति च वह्निमान्धूमादित्यादौ धूमस
मानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकं वह्नित्वं तदवच्छिन्नसामानाधिकरण्यो धूमः
धूमवान्वह्नेरित्यादौ च वह्निसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकमेव धूमत्वमिति
नातिव्याप्तिः॥ प्रतियोगितावच्छेदकावच्छिन्नेत्यादि यथाश्रुतं तु न संगच्छते॥ वह्निमान्धूमादित्या
दौ सर्वेषामेव वह्नीनां तादृशप्रतियोगितावच्छेदकत्वं न वह्नित्वं वह्नि जलोभयत्वाद्यवच्छि
न्नत्वादसंभवापत्तेः॥ न चैवमपि वह्निसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदक
प्रमेयत्वतदवच्छिन्नसमानाधिकरणो वह्निरिति व्याप्तिरिति वाच्यं॥ व्यभिचारिणोपि व
ह्न्यादेः प्रमेयत्वादिरूपेण [redacted] धूमादेर्व्याप्यताभ्युपगमात्॥ धूमत्वेनैव वा धूमो न वह्निव्याप्यः
कः प्रमेयत्वादिना तु व्यापकोभवत्येव॥ अत्र सत्तावान्द्रव्यत्वादित्यतिरिक्तसाध्यकेसाध्यता राम ५९

वच्छेदकसंबंधावच्छिन्नसाध्यसामान्याभावमादायाव्याप्तिवारणाय हेतुसमानाधिकरणत्वमसंताभा
वविशेषणीतच्च हेतुतावच्छेदकसंबंधेन हेतुतावच्छेदकावच्छिन्नहेतोर्यदधिकरणं तत्त्वं येन केनापि संबं
धेन वर्त्तमानत्वं। अन्यथा इदं गगनं गगनत्वप्रकारकप्रमाया इत्यादौ विशेष्यतासंबंधेन हेतुतायां
समवायेन संबंधेन हेत्वधिकरणे आत्मनि वर्त्तमानस्य गगनत्वसामान्याभावस्य प्रतियोगितावा
च्छेदकमेव गगनत्वं तन्मिश्यव्याप्तिः स्यात् तस्याश्च द्रव्यं गुणान्यत्वविशिष्टसत्वादित्यादौ हेतुभ्र
तसत्ताधिकरणे वर्त्तमानस्य द्रव्यत्वाभावस्य प्रतियोगितावच्छेदकमेव द्रव्यत्वमिति सव्याप्तिः
न च हेतौ साध्यसामान्याभावप्रतियोग्यसमानाधिकरण्यविरहात्। प्रतियोग्यसमानो
धिकरणत्वस्य हेतोर्विशेषणीयत्वेनैव नैतदव्याप्तिद्वयावकाश इति वाच्यं प्रथमे आत्मरू
पहेत्वधिकरणमादाय द्वितीये च गुणादिकमादाय वक्ष्यमाणक्रमेणाद्विविधप्रतियो
ग्यसामानाधिकरण्यस्यैव हेतौ सत्वात्। तच्चानुपदं स्फुटीभविष्यति। अधिकरणत्वं च
संबंधित्वमात्रं तेन तादात्म्यादिरूपानियामकसंबंधेन हेतुतायां हेतुतावच्छेदकसंबं नियामकः
धेन हेत्वधिकरणत्वाप्रसिद्धावपि नाव्याप्तिः। संबंधित्वं च धर्मित्वं तच्च वृत्तिनियामक
संबंधमात्रानिरूपितसंबंधिमात्रसाधारणो धर्मधर्मिभावाख्यः स्वरूपसंबंधविशेषः।

न त्वाधारमात्रवृत्ति। अत एव नागृहीतासंसर्गकधर्मधर्मिगोचरैकज्ञानत्वं विशिष्टज्ञानत्व
८० मिति मीमांसकाः। अन्यथा घटस्य ज्ञानं चैत्रस्य धनमित्यादिविषयकस्य स्वत्वादिस्वनिया
संबंध ३ मकसंसर्गकविशिष्टप्रत्यक्षादौ लक्षणाव्याप्त्यापत्तेः। एतेन हेतुतावच्छेदकसंबंधेन हे
60 तुतावच्छेदकावच्छिन्नहेतोरधिकरणत्वविवक्षणे वृत्त्यनियामकसंबंधेन हेतुतायामव्या
प्तिः। तादृशहेतोः संबंधित्वमात्रविशेषणे च द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिस्तदवस्थ।
२ गुणादौ विशिष्टसत्तानिरूपिताधारताविरहे पि तत्संबंधितायाः सत्त्वादिति निरस्तं। विशि
ष्टनिरूपिताधारतावद्विशिष्टनिरूपितायाः धर्मितापरनाम्न्याः संबंधितायाः वि[illegible] अपि
लक्षणतया गुणादावसत्त्वात्। सत्तावान् द्रव्यत्वादित्यादौ द्रव्यत्वस्याधिकरणे महाका
लादौ कालिकविशेषणतया वर्तमानस्य सत्त्वादिसामान्याभावस्य प्रतियोगितावच्छेद
कमेव सत्तात्वादिकमिति व्याप्तिः। एवं कपिसंयोगी एतत्त्वादित्यादौ व्याप्यवृत्तिसाध्यकहेतु
सद्धेताव व्याप्तिश्च। साध्यसामान्याभावस्यापि निरुक्तहेतुसमानाधिकरणत्वात्। अ
तः प्रतियोगिसमानाधिकरणेति यत्पदार्थस्य हेतोर्विशेषणं। तथा च स्वप्रतियोगि
समानाधिकरणस्य हेतुतावच्छेदकावच्छिन्नहेतोर्हेतुतावच्छेदकसंबंधेन संबं राम

चिन्नियेनकेनापि संबंधेन वर्त्तमानो योऽभावस्तत्प्रतियोगितावच्छेदकं यद्यद्धर्मः। स्वपदं मभा
वपरं। नच साध्यसाधनभेदेन व्याप्तिभेदात्कुत्राप्यवृत्तिसाधकस्थले नेदं विशेषणं सफलं। अ
भाव विशेषणतावि शेषसंबंधेन साध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छे
दकतान्यतरावच्छेदकसंबंधेनहेत्वधिकरणवृत्ति तद्विशेषणादेव साध्याभावस्य यथा
कथंचित्संबंधेन हेत्वधिकरणावृत्तितामादाय व्यतिरेकिसाध्यकमात्राव्याप्तिवारणसंभव
इतिवाच्यं। तत्राप्येतद्विशेषणानुपादानेसाध्याभावस्याप्यवृत्तित्वभ्रमेण हेतुसमाना
धिकरणपभ्रमेऽनुमितिअनुदयापत्तेः हेतुसमानाधिकरणाभावप्रतियोगितायाः साध्यता
वच्छेदकावच्छेदकत्वग्रहेतादृशप्रतियोगितासामान्ये साध्यतावच्छेदकावच्छेदसाभावग्रह
संभवात् प्रकृतलक्षणेवक्ष्यमाणयुक्त्यातथैव विवक्षणीयत्वात् इति भावः। स्वप्रतियो
गिसमानाधिकरणत्वं च न स्वप्रतियोगव्यधिकरणे केनापि संबंधेन वर्त्तते यत्तत्त्व
तं संयोगिसत्त्वादिसाध्ये अतिव्याप्तेः। सत्तायाः द्रव्ये संयोगाभावस्य प्रतियोगिसमाना
धिकरणत्वात् किंतु स्व प्रतियोगिव्यधिकरणे केनापि संबंधेन वर्त्तमानत्वं सामान्याभावः
तथा च सामानाधिकरण्यस्याप्यवृत्तितयाऽनुपादाने च संयोगसमानाधिकरण्याप्ते

ताभाववत्त्वमतो नातिव्याप्तिः। एतेन इदं वाच्यं ज्ञेयत्वादित्यादौ तादृशाभावस्यैवाप्रसिद्धिः। यदभावप्र
६१ तियोगि[redacted]समानाधिकरणं ज्ञेयत्वमित्यपि निरस्तं। सामानाधिकरण्यस्य व्याप्यवृत्तितया
सामान्यतोऽभावस्यैव तादृशस्य प्रसिद्धत्वात्। न चैवं हेतुव्याप्यवृत्तितया वह्निमान् धूमा
61 दित्यादावव्याप्तिः। हेतुसमानाधिकरणस्य साध्यसामा[redacted]माभावस्यापि धूमानवयवाव
वे हेतौ न प्रतियोगिसामानाधिकरण्याभावस्यापि धूमादौ सत्त्वादिति वाच्यं। स्वप्रतियोगिय
धिकरणावर्त्तमानत्वसामान्याभावविशिष्टहेतुतावच्छेदकावच्छिन्नहेतौ हेतुतावच्छेदकसंबं
धेनाधिकरणत्वस्य विवक्षितत्वात्। इत्थं च वह्निमान् धूमादित्यादौ वह्न्यादिसामान्याभावस्य प्र
तियोग्यधिकरणवृत्तित्वाभावविशिष्टहेतुतावच्छेदकावच्छिन्नहेतौ हेतुतावच्छेदकसंबंधे
न अधिकरणमेवाप्रसिद्धमतो अभावांतरस्यैव लक्षणघटकतायां नाव्याप्तिः। क्वचित्तु प्र
तियोगिसमानाधिकरणत्वं तदभावविशेषणं। न चैवं कपिसंयोगी एतद्वृक्षत्वादित्यत्राव्या
प्तिस्तदवस्था। संयोगी सत्त्वादित्यादावतिव्याप्तिवारणाय सामानाधिकरण्यस्याव्या
प्यवृत्तित्वाभ्युपगमावश्यकतया हेतुसमानाधिकरणकपिसंयोगाभावस्यापि व
गुणादौ प्रतियोगिसमानाधिकरणत्वादिति वाच्यं। स्वप्रतियोगिसमानाधिकर

ण्याविच्छिन्नाभावे हेत्वधिकरणवृत्तितया विवक्षितत्वादित्याहुः। तदसत् विशिष्टस्या
नतिरेकतया गुणादौ घटत्वविशिष्टसत्तायां गुणादिवृत्तित्वप्रतियोगिसमानाधिक
रण्याभावविशिष्टकपिसंयोगाभावस्याप्येतद्वृक्षवृत्तित्वात्। न च हेत्वधिकरणावच्छेदेन प्र
तियोगिसामानाधिकरण्यस्य ण्याभावत्वं विवक्षितं। एतद्वृक्षाभावे च हेतुसमानाधिकरणत्वा
पदमितिवाच्यं कुत्रापि स्वलक्षणानापत्तेः। वस्तुतस्तु प्रतियोग्यसमानाधिकरणत्वं न प्र
तियोग्यधिकरणवृत्तित्वाभावः। सत्तायां गुणेन संयोगाभावप्रतियोगिसमानाधिकर
णत्वमिति प्रकृते गुणादौ सत्तानिष्ठताद्रूप्यसामानाधिकरण्यस्यावच्छेदकतासंबंधेना
भावविषयतया सामानाधिकरण्यस्याप्यवृत्तित्वमानाभावेन संयोगिसत्त्वादिसाद
वाति व्याप्तिः। किंतु प्रतियोग्यनधिकरणो येन केनापि संबंधेन वर्तमानत्वं तदपि हेतुविशेष
णीभूतभावविशेषणा कपिसंयोगी एतद्वृक्षत्वादिसाध्यकव्याप्तितादवस्थ्यात्। हेतुसमा
नाधिकरणा कपिसंयोगाभावस्यापि गुणादिवृत्तितद्विशिष्टस्यानतिरिक्ततया प्रतियो
ग्यनधिकरणावृत्तित्वविशिष्टस्याभावस्य हेत्वधिकरणावृत्तिताविवक्षणेप्यनिस्तारात्। न
च निरुक्तप्रतियोग्यनधिकरणवृत्तित्वस्य हेतुविशेषणत्वेपि न हेत्वव्याप्यवृत्तितया वन्हिमा

धूमादिसाध्यकव्याप्तिः। धूमादेर्धूमाधारादिसमानाधिकरणवह्न्यादिसामान्याभावस्यापि प्रति
८२ योग्यनधिकरणे धूमावयवादौ वृत्तेः। नापि संयोगी एतत्त्वाविशिष्टसत्त्वादिसाध्यकव्याप्तिः
नानिरुक्तहेतुसमानाधिकरणाभावस्यापि संयोगसामान्याभावविशिष्टस्यानतिरि
६२ क्ततया तत्प्रतियोग्यनधिकरणादिवृत्तेरपि हेतुतावच्छेदकविशिष्टहेतुप्रतियोगिताव त
च्छेदकत्वात् नापि संयोगत्वस्येतिवाच्यम्। निरुक्तप्रतियोग्यनधिकरणवृत्तित्वविशिष्ट व
हेतुतावच्छेदकावच्छिन्नहेतौ हेतुतावच्छेदकसंबंधेनाधिकरणमेवाप्रसिद्धमिति अभावांत
रस्यैव लक्षणघटकत्वात् व्याप्तिः। इत्थं च प्रतियोग्यनधिकरणीयहेतुतावच्छेदकसंबंधे
येन नहेतुतावच्छेदकविशिष्टहेत्वधिकरणं तन्निष्ठेनापि संबंधेन वर्त्तमानो योभावस्तदभावीता
र्थ्यो निष्कर्षः। प्रतियोग्यनधिकरणहेत्वधिकरणस्यैव प्रतियोग्यनधिकरणवृत्तित्वविशि
ष्टहेत्वधिकरणतया वृत्तित्वपर्यंतप्रवेशो गौरवात्प्रयोजनाभावाच्च। अत्र च प्रतियोग्यन
धिकरणत्वं प्रतियोगितावच्छेदकसंबंधेन यत्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसं
बंधितदन्यत्वं। अन्यथा ज्ञानवान्वाच्यत्वात् पाहि मा धूमा दिशादौ समवायेन ज्ञानवद्भा
देः साध्यतायां इदं वाच्यं ज्ञेयत्वात् दिशादौ कालिकसंबंधेन वाच्यत्वादेः साध्यतायां चाति राम

८२

व्याप्त्यापत्तेः। हेतुसमानाधिकरणस्य समवायसंबंधावच्छिन्नज्ञानवत्त्वाद्यभावस्य कालिक
संबंधावच्छिन्नवाच्यत्वाद्यभावस्य विषयत्वसंयोगादिवैशेषणताविशेषसंबंधेन प्रतियोग्यधि
करणमेव हेत्वधिकरणमिति यभावांतर एव ताद्दशः तत्प्रतियोगितानवच्छेदकत्वज्ञानत्ववान्हि व
त वाच्यत्वादेर्गुणकर्मान्यत्वविशिष्टसत्तावान् जातेः मूर्त्तत्वमूर्त्ततो भयवान् मूर्त्तत्वादिसाध्याव
त्तिव्याप्त्यापत्तेश्च। हेतुसमानाधिकरणस्य विशिष्टसत्ताद्यनवच्छिन्नाभावस्य प्रतियोगितावच्छे
दकसंबंधेन प्रतियोग्यधिकरणमेव हेत्वधिकरणमिति यभावांतर एव ताद्दशः तत्प्रतियोगिता
नवच्छेदकत्वाद्विशिष्टसत्तात्वादेः विषयतादिरूपनियामकसंबंधेन घटत्वादेः साध्यतायां
ज्ञानत्वादिहेतौ विषयितसंबंधावच्छिन्नघटाद्यभावस्य प्रतियोगितावच्छेदकसंबंधेन प्रतियो पा
अ ग्यधिकरणाप्रसिद्ध्या व्याप्तितिव्याप्त्यापत्तिरतो अधिकरणत्वमाहाय संबंधितानुधावनीयं केचि
त्तु प्रतियोग्यनधिकरणत्वं साध्यतावच्छेदकसंबंधेन यत्प्रतियोगितावच्छेदकावच्छिन्नस्य त
संबंधितदन्यत्वं। तावतापि ज्ञानवान् द्रव्यत्वादित्यादावतिव्याप्तिवारणसंभवोद्धरणात्। तदस
त्वा विषयत्वकालिकविशेषणतादिसंबंधेन घटादेः साध्यतायां निरुक्तज्ञानत्वमहाकालत्वादिहे
तावव्याप्त्यापत्तेः। हेत्वावच्छेदकसंबंधेन हेत्वधिकरणस्य साध्यतावच्छेदकविषयितासंबंधेन
दि

अभावमात्रस्यैवप्रतियोगिसंबंधितयाताद्दशाभावाप्रसिद्धेः।प्रतियोगितावच्छेदकसंबंधेनतथा
६३ त्वाभिधानेचसंबंधांतरावच्छिन्नाभावमादायैवप्रसिद्धिरित्यनुपदंवक्ष्यमः।प्रतियोगि
तावच्छेदकावच्छिन्नत्वंचप्रतियोगितावच्छेदकतावच्छेदकसंबंधेनबोध्यं।गुणकर्मान्यत्ववि
63 शिष्टसत्ताभावान्सत्वादित्यादौहेत्वधिकरणस्यगुणकर्मादेःस्वरूपसंबंधेनगुणकर्मान्य
त्वविशिष्टवतःसत्वादेःसमवायसंबंधेनाधिकरणत्वेपिनातिव्याप्तिः।ननुप्रतियोगितावच्छेदका
वच्छिन्नासंबंधित्वंकिंप्रतियोगितावच्छेदकावच्छिन्नस्ययस्यकस्यापिसंबंधित्वंप्रतियोगि
तावच्छेदकावच्छिन्नसामान्यासंबंधित्वंवाप्रतियोगितावच्छेदकयत्किंचिद्वावच्छिन्नसा
मान्यासंबंधित्वंवा।आद्येकपिसंयोगीएतद्वृक्षत्वादित्यादावव्याप्तिः।कपिसंयोगत्वा
वच्छिन्नयत्किंचित्कपिसंयोगासंबंधित्वादेतद्वृक्षत्वस्य।द्वितीयेवह्निमान्धूमादि
त्यादावसंभवः।यतएवविधाभावोनास्तियस्यप्रतियोगितावच्छेदकावच्छिन्नसामान्या
संबंधिहेतुसंबंधिपर्वतादिवृत्तिजलत्वाद्यभावनिष्ठस्याकाशाभावाभावादिभेदस्या
भावाधिकरणगगनाभावत्वेनाधिकरणस्वरूपतयाआकाशाभावादेरपिजलत्वाद्य
भावप्रतियोगितासंबंधित्वात्पर्वतादेः।नचद्रव्यत्वात्मकभावरूपाभावएवताद्दशः

प्रसिद्ध इति वाच्यं अभावस्यापि स्वसमानाधिकरणान्योन्याभावाभिन्नत्वात् [redacted] तद्भेदस्य चाधिकरणस्वरूपानतिरिक्ततया अन्योन्याभावरूपप्र
तियोगिसंबंधिहेतुसंबंधित्वात् अन्योन्याभावात्यंताभावस्य अधिकरणा [redacted] सेत्यपि
रिक्तत्वेपि अन्योन्याभावान्योन्याभावस्याधिकरणस्वरूपानतिरिक्तत्वात् न च नव्यनये अ
भावाधिकरणाभावस्यान्योन्याभावान्योन्याभावस्य वा अधिकरणस्वरूपत्वाभावा
त् अत्यंताभावत्वाविरूपितप्रतियोगितावच्छेदकत्वाच्छिन्नसामान्यासंबंधित्वस्य दिवाप्रसि
त्तत्वाच्चैतत् प्रासिद्धिरिति वाच्यं तथा सति सर्वेषामेव भावरूपाणामभावरूपाणां वा अ
भावानां पर्वतक्षणादियावत्किंचिद्वृत्तित्वविशिष्टस्वप्रतियोगिभावात्यंताभावात्मकत्वस्य सर्वत्र सिद्धतया
तादृशाभावरूपप्रतियोग्यधिकरणमेव हेत्वधिकरणमिति प्रसिद्धेर्दुर्वारत्वात् पर्वतक्षणा
दिवृत्तित्वविशिष्टानां घटादिवृत्तित्वविशिष्टानां वा जलत्वाभावानामभावाभावस्य विशि
ष्टजलत्वाभावादेः केवलजलत्वानतिरिक्तत्वात् द्वितीये घटत्वाभावो घटत्वाभावत्वादिप्र
दो तादात्म्यसंबंधेनाभावसाध्यकेऽव्याप्तिः। गोत्वादिरूपयत्किंचित्प्रतियोगितावच्छेदक

वच्छिन्नासंबंधिहेतुसंबंधिनिष्ठस्य गवत्वादिभेदस्य प्रतियोगितावच्छेदकत्वाद्घटत्वाभाव
९४ त्वादेः प्रांचां नये अभावाधिकरणकाभावप्रतियोगिकाभावस्याधिकरणस्वरूपानतिरिक्त
तया गवत्वादिभेदे वर्त्तमानस्य घटत्वाभावादिभेदस्य गवत्वादिभेदस्वरूपतया कपिसंयोगाभावे साध्ये
64 आत्मत्व द्रव्यत्वादिहेतावव्याप्तिश्च आत्मत्वादिसमनाधिकरणकपिसंयोगाभावाभावस्य कपिसंयोगस्य
गुणसामान्याभावस्वरूपतया किंच प्रतियोगितावच्छेदकावच्छिन्नसामान्यासंबंधित्वादसामादेरिति। मैवं।
स्वावच्छेदकसंबंधेन स्वावच्छेदकावच्छिन्नसामान्यासंबंधिनिरूक्तहेतुसंबंधिनिष्ठाभावनिरूपिततया
प्रतियोगितातदनवच्छेदकत्वस्य विवक्षितत्वात् । स्वपदं प्रतियोगितापरं। इत्थं च वह्निमान्धूमादित्या
दौ जलत्वाद्यभावस्य जलत्वादिनिष्ठजलत्वत्वाद्यवच्छिन्नप्रतियोगिताया एव तादृशप्रसि
द्धः प्रतियोगितावच्छेदकभेदेन प्रतियोगिताभेदात् तदनवच्छेदकं च वह्नित्वादिकमिति नासंभवः।
घटत्वाभावो घटत्वाभावत्वादित्यादौ च घटत्वाभावत्वावच्छिन्न घटत्वाभावनिष्ठगवादिभेदनि
रूपिताप्रतियोगिताव्यक्तिर्न तादृशी। किंतु गवादिनिष्ठगोत्वावच्छिन्नतदीयप्रतियोगिता
व्यक्तिरेव तादृशी तदनवच्छेदकमेव घटत्वाभावत्वमिति नाव्याप्तिः। एवं कपिसंयोगाभाववानात्म

त्वादिसाध्यावपि कपिसंयोगाभावत्वावच्छिन्नकपिसंयोगाभावनिष्ठकपिसंयोगनिरूपितप्रति
योगितानिरूपिततादृशीकिंतु गुणादिसामान्याभावनिष्ठगुणसामान्याभावत्वावच्छिन्नतदीयप्रति
योगिताव्यक्तेरेव नादृशी तदनवच्छेदकमेव कपिसंयोगाभावत्वमिति नाव्याप्तिः। वस्तुतस्तु
स्वानवच्छेदकसंबंधेन स्वावच्छेदकावच्छिन्नसामान्यासंबंधिनिरूपितहेतुसंबंधिकायायाः
प्रतियोगितास्तदनवच्छेदकं यद्विशेषणविशेषणीयाभावनिवेशप्रयोजनविरहादिति तत्वाता
दृशीयायाप्रतियोगितातदनाश्रयोयस्तेन समं सामानाधिकरण्यमित्युक्तावसंभवः। वह्नि
मान्धूमादित्यादौ सर्वेषामेव वह्नीनां तत्तद्वह्नित्वोभयत्वाद्यवच्छिन्नप्रतियोगितायास्तादृश्या आश्र
यत्वादतोऽवच्छेदकानुसरणं। नन्वेवमपि वह्निमान्धूमादित्यादौ असंभवः वह्नित्वादेर्म
हानसीयत्वविशिष्टवह्नित्वाद्यवच्छिन्नप्रतियोगितायास्तादृश्या अवच्छेदकत्वाद्विशिष्टस्यानवच्छे
दकत्वे तद्घटकतया विशेष्यस्याप्यवच्छेदकत्वात्। अथानवच्छेदकत्वं पर्याप्त्याख्यसंबंधेनावच्छे
दकताशून्यत्वं तथा च वह्नित्वादिर्न केवलं न महानसीयत्वविशिष्टवह्नित्वावच्छिन्नप्रतियो
गितायाअवच्छेदकतापर्याप्त्यधिकरणमतो नासंभवः। न च तथापि दंडिमान्दंडिसंयोगा

६५ 65 दिसादिनानाव्याप्तिसाध्यतावच्छेदकस्थलेऽव्याप्तिः। साध्यतावच्छेदकीभूततानां सर्वासामेव दंड
व्यक्तीनां[illegible]वाल्लनीमायेन दंडसंयोगवानिष्ट तत्तद्दंडावच्छिन्नप्रतियोगितानां तत्तद्दंडाभावप्रतियो
गितायास्तादृश्या अवच्छेदकतापर्याप्त्यधिकरणतादिति वाच्यं। जातिखंडोपाध्यतिरिक्तपदा
र्थस्य स्वरूपतोऽभावप्रतियोगितानवच्छेदकतया दंडव्यक्तीनां पर्याप्त्याख्यसंबंधेनावच्छेदक
तावत्त्वविरहात्तत्तद्दंडत्वस्याप्यवच्छेदककोटिप्रविष्टत्वादिति चेन्न तथा सति मह
नसीयत्वविशिष्टवह्निमान्धूमादित्यादावतिव्याप्तिः। वह्नित्वस्य पर्याप्त्याख्यसंबंधेनावच्छे
दकतानन्यतया महानसीयत्वविशिष्टवह्नित्वस्यापि तथात्वात्। महानसीयत्वविशिष्टव
ह्नित्वस्य वह्नित्वानतिरिक्तत्वात्। तद्दंडिमान्दंडसंयोगादित्यादावतिव्याप्तिश्च जातिख
डोपाध्यतिरिक्तपदार्थस्य स्वरूपतोऽभावप्रतियोगितानवच्छेदकतया साध्यतावच्छेद
कीभूततद्दंडव्यक्तेरपि पर्याप्त्याख्यसंबंधेन तादृशप्रतियोगितावच्छेदकतानन्यत्वा
दिति। मैवं। स्वावच्छेदकसंबंधेन स्वावच्छेदकावच्छिन्नसामान्यासंबंधिनिरूपितहेतुसंबं
धितायाया प्रतियोगिता तत्तत्प्रतियोगितासामान्ये यद्धर्मपर्याप्त्यवच्छेदकताकत्वाभावस्त राम

द्धर्मावच्छिन्नसामानाधिकरण्यस्य विवक्षितत्वाद्यद्येन रूपेण यस्य साध्यतावच्छेदकत्वं त
त्तेन रूपेण तद्वत्त्वं यद्धर्मपदेन ग्राह्यं। इत्थं च वह्निमान् धूमादित्यादौ धूमवन्निष्ठमहानसी
यवह्नित्वावच्छिन्नप्रतियोगिताकाभावप्रतियोगितायां महानसीयत्वविशिष्टवह्नित्वप
र्याप्तावच्छेदकताकत्वेऽपि शुद्धवह्नित्वस्यैव साध्यतावच्छेदकतया शुद्धवह्नित्वपर्याप्ता
वच्छेदकताकत्वविरहान्नासम्भवः। महानसीयत्वविशिष्टवह्निमान् धूमादित्यादौ च धू
मवन्निष्ठमहानसीयवह्नित्वावच्छिन्नप्रतियोगिताकाभावप्रतियोगितायास्तादृशप्र
तियोगितान्तर्गतायाः साध्यतावच्छेदकीभूतमहानसीयत्वविशिष्टवह्नित्वपर्याप्तावच्छे
दकताकत्वान्नातिव्याप्तिः। एवं तद्दण्डिमान् दण्डिसंयोगादित्यादौ दण्डिसंयोगवन्निष्ठ
तद्दण्ड्यभावप्रतियोगितायास्तादृशप्रतियोगितान्तर्गतयाः शुद्धदण्डिव्यक्तिपर्याप्ताव
च्छेदकताकत्वाभाववत्त्वेऽपि तद्दण्डत्वविशिष्टतद्दण्डव्यक्तेरेव साध्यतावच्छेदकतया तादृशा
तद्दण्डव्यक्तिपर्याप्तावच्छेदकताकत्वान्नातिव्याप्तिः। एतेन द्रव्यत्वव्याप्यजातिविशिष्टवा
द्रव्यसमवायित्वादित्यादिना नानाजातिसाध्यतावच्छेदकस्थलेऽव्याप्तिः। साध्यताव

छेदकीभूतानां सर्वासां द्रव्यत्वव्याप्यजातीनां चालनीन्यायेन द्रव्यसमवायिनि वर्त्तमानस्य
स्वरूपतः पृथिवीत्वजलत्वादिरूपद्रव्यत्वव्याप्यतत्तज्जात्यवच्छिन्नप्रतियोगिताकाभावस्य प्र
तियोगितावच्छेदकतापर्याप्त्यधिकरणत्वात्। जातिसंरक्षकोपाध्यतिरिक्तपदार्थस्यैव स्वरूपतो
ऽवच्छेदकतानभ्युपगमादित्यपि परास्तं॥ महानसीयत्वविशिष्टवह्निमान् धूमान् दण्डिमान् दण्डिसं
योगादित्यादावृत्तिव्याप्तिवारणाय यथोक्तविवक्षाया आवश्यकत्वेन तत्त एवात्राप्यव्याप्तेर्निरासात्।
स्वरूपतः पृथिवीत्वजलत्वाद्यवच्छिन्नप्रतियोगितायां द्रव्यत्वव्याप्यजातित्वविशिष्टपर्याप्तावच्छेद
कत्वाभावात्। न चैवं विवक्षणे घ्राणग्राह्यगुणवान् पृथिवीत्वादित्यादौ लघुसमनियतगुरुरूपेण
साध्यतायामव्याप्तिः। स्वरूपसंबंधरूपावच्छेदकत्वस्य संभवति लघुधर्मे गुरावभावेन घ्राणग्राह्य
गुणवत्त्वनिष्ठावच्छेदकताप्रसिद्धेः। लाघवात् गंधत्वस्यैव प्रतियोगितावच्छेदकत्वात् अनतिरिक्तवृ
त्तित्वरूपावच्छेदकत्वप्रवेशे सत्तावान् जातेरित्यादावेवाव्याप्तेः। विशिष्टसत्तात्वाद्यवच्छिन्नप्र
तियोगितायां अनतिरिक्तवृत्तित्वात् सत्तात्वादेरिति वाच्यं। लघुसमनियतगुरुधर्मेण साध्य
तायामलक्ष्यत्वात्। अत एव गुरुधर्मो नतार्यं तावच्छेदकस्तन्निष्ठपर्याप्तावच्छेदकताप्रसि

ध्यातेन रूपेण व्यापकत्वविरहात्। यथोक्तव्यापकतायाश्च कारणताघटकत्वात्। अन्यथा गुरुधर्मरू
पेणादिव्यापकत्वे कार्याव्यवहितपूर्वत्वव्यापकतावच्छेदकान्यथासिद्ध्यनिरूपकधर्मस्यैव कारणताव
च्छेदकत्वतया गुरुधर्मस्यापि कारणतावच्छेदकत्वापत्तेः। गुरुधर्मस्य कार्यतानवच्छेदकत्वे तद्घटितव्याप
कत्वस्य गुरुगौरवेण कार्यतापदार्थत्वविरहात्। वस्तुतस्तु लघुसमनियतगुरुधर्मस्य शक्यतावच्छेदकत्व
वच्छेदकत्वेपि कंबुग्रीवादिमान्नास्तीत्याद्यबाधितप्रतीतेः प्रतियोगितायाः अवच्छेदकत्वमस्त्येवान
हितप्रतीतेस्तत्प्रतियोगिताकाभावमात्रं विषयः तथाविधयत्किंचिद्धर्मसत्वेपि तादृशप्रतीत्या
पत्तेः। गुरुधर्मस्य कारणतानवच्छेदकत्वं च अवश्यं कॢप्तनियतपूर्ववर्त्तिसहभावादिव दोषरसा
पि स्यात् तेनान्यथासिद्धिसंपादकत्वात्। यदा कार्याव्यवहितपूर्वत्वव्यापकतावच्छेदकान्य
थासिद्ध्यनिरूपकधर्मस्यैव न कारणतावच्छेदकत्वमपितु तादृशधर्मवत्वरूपस्यातिरिक्तस्य
उपदार्थरूपस्य वा कारणत्वस्य स्वरूपसंबंधविशेषरूपावच्छेदकत्वमत एव कारणतावच्छेदक
त्वं तथा च लघुसमनियतगुरुधर्मस्य प्रतीतिबलादभावप्रतियोगितायाः स्वरूपसंबंधरू
पावच्छेदकत्वेपि यथोक्तरूपायाः कारणतायाः स्वरूपसंबंधरूपावच्छेदकत्वविरहादेव न
कारणतावच्छेदकत्वं। न चैवं दंडत्वादेर्लघुधर्मस्यापि कारणतायास्तादृशावच्छेदकत्वे
मानाभावः। कारणतावच्छेदकधर्मवत्वस्यैव कारणतारूपत्वेन दंडत्वस्यैव कारणतारूप

तेरे

८७ तयास्वरूपेणैव स्वावच्छेदकत्वासंभवाच्चेति वाच्यं। दंडत्वेन घटकारणत्वमित्यादिप्रतीतेरेवमानत्वात्
67 प्रतीतिबलात्स्वस्यापि धर्मान्तरविशिष्टस्वावच्छेदकत्वाद्येसेवतत्वं। ननु तथापि असंभवः। व
ह्निमान् धूमादित्यादौ धूमादिसमानाधिकरणावच्छिन्नाद्यन्योन्याभावप्रतियोगितायाः स्वादृ
त्वासमवायादियत्किंचित्संबंधावच्छिन्नवन्ह्यादिसामान्याभावप्रतियोगितायाश्च तादृश
प्रतियोगितान्तर्गतायावन्हित्वाद्यवच्छेद्यत्वात्। नचसाध्यतावच्छेदकसंबंधावच्छिन्नत्वेन प्रतियो
गितावच्छेदकयोर्विशेषणीयाः स्वावच्छेदकसंबंधेनेति स्थाने साध्यतावच्छेदकसंबंधेनेति वाच
कत्वामिति वाच्यं। तथासति कालिकसंबंधेन घटादेः साध्यत्वे कालपरिमाणादेर्हेतोर्व्याप्य
त्वेस्तत्र स्वावच्छेदकसंबंधेन स्वावच्छेदकावच्छिन्नासंबंधिनिरूपकहेतुसंबंधिकायाः सा
ध्यतावच्छेदककालिकसंबंधावच्छिन्नप्रतियोगितायाः साध्यतावच्छेदककालिकसंबंधेन
स्वावच्छेदकावच्छिन्नासंबंधिऽनिरूपकहेतुसंबंधिकायाश्चाप्रसिद्धत्वात्। निरूपकहेतुसं
बंधिनो महाकालस्य कालिकसंबंधेन वृत्तिमन्मात्रस्यैवाधारत्वात्। नच कालिकसंबंधा
वच्छिन्नगगनाद्यभावप्रतियोगितैव तादृशी प्रसिद्धा। तस्याः स्वावच्छेदककालिकसंब
धेन स्वावच्छेदकगगनत्वाद्यवच्छिन्नासंबंधित्वस्य हेतुसंबंधिमहाकालेसत्वात्। महा
कालस्य गगनाद्यसंबंधित्वादिति वाच्यं। कालिकसंबंधेन गगनादेर्वृत्तिमत्वे महाका राम

त्वस्य कालिकसंबंधेन गगनादेरपिसंबंधित्वात्। तेनसंबंधेन रवृत्तिहेतुतेनसंबंधेनगगनत्वा
द्यवच्छिन्नसंबंध्यवेद्यप्रसिद्धमित्युभयथापि कालिकसंबंधावच्छिन्नगगनाद्यभावप्रतियोगिता
मादायप्रसिद्ध्यसंभवात्। एवं च घटवाञ्ज्ञानीसज्ज्ञानसत्त्वादित्यादौ विषयितासंबंधेन घटादिसा
ध्यके विषयितासंबंधावच्छिन्नगगनाद्यभावप्रतियोगितामादायापिन प्रसिद्धिसंभवः। विषयि
तयागगनादेरपिनियज्ञानेसत्त्वादितिमैवं। स्वावच्छेदकसंबंधेनस्वावच्छेदकावच्छिन्नसामान्या
संबंधिनिरूपकहेतुसंबंधिकप्रतियोगितासामान्येसाध्यतावच्छेदकसंबंधावच्छिन्नत्वयद्धर्म
निष्ठपर्याप्तावच्छेदकत्वोभयाभावस्तद्धर्मावच्छिन्नसामानाधिकरण्यस्यविवक्षितत्वात्। इ
त्थं च घटवान्कालपरिमाणादित्यादौ समवायेत्यादिसंबंधावच्छिन्नघटाद्यभावप्रतियोगिता
मादायैवप्रसिद्धिः। एतेन घटत्वाभाववान्पटत्वादित्यादावव्याप्तिः। पटत्वसमानाधिकरणस्य
गोत्वाभावादेर्घटत्वाभावनिष्ठप्रतियोगितायाघटत्वाभावत्वावच्छेद्यत्वात्। अभावाधिकर
णकाभावप्रतियोगितामावस्याधिकरणस्वरूपानतिरेकितयागोत्वाभावादिनिष्ठघटत्वा
भावभेदस्य गोत्वाभावादिस्वरूपत्वेन घटत्वाभावस्यापि गोत्वाभावादिप्रतियोगित्वात्। तत्प्र
तियोगितायाम्यक्तेः स्वावच्छेदकतादात्म्यसंबंधेनस्वावच्छेदकावच्छिन्नासंबंधित्वस्यापिहेतु
संबंधिनिसत्त्वादित्तिप्राचां दूषणमप्यपास्तं॥ तत्प्रतियोगितायाम्यक्तेः घटत्वाभावत्वावच्छेद्य

९८

त्वेपि साध्यतावच्छेदकसंबंधावच्छिन्नत्वाभावेनोभयाभाववत्वात्। अथैवमपि घटवन्निष्ठज्ञानत्वादिसा
ध्ये वृत्त्यनियामकविषयितादिसंबंधेन साध्यतायामव्याप्तिस्तादात्म्यातिरिक्तवृत्त्यनियामकसंबं
धमात्रस्याभावप्रतियोगितानवच्छेदकत्वेन तत्र साध्यतावच्छेदकसंबंधावच्छिन्नत्वस्याप्रसिद्धत्वा
त्। यदि च वृत्त्यनियामकविषयितादिसंबंधस्याभावप्रतियोगितानवच्छेदकत्वेपि घटवज्ज्ञा
नात्यंताभावादेः प्रतियोगितानवच्छेदकतावच्छेदकत्वमस्त्येवेत्यभावप्रतियोगितावच्छेदकतायामे
व तदवच्छिन्नत्वप्रसिद्धिरित्युच्यते तदापि वृत्त्यनियामकविषयितादिसंबंधेन साध्यतायां
घटवज्ज्ञानत्वादिसाध्यादाव्याप्तेर्वृत्त्यनियामकसंबंधस्याभावप्रतियोगितानवच्छेदकत्वे
न ज्ञानत्वसमानाधिकरणाभावप्रतियोगितायां विषयितादिसंबंधावच्छिन्नत्वघटत्वाद्यव
च्छिन्नोभयाभावसत्वादिति चेन्न। वृत्तिमन्नियामकसंबंधवद्वृत्त्यनियामकसंबंधस्यापि अ
भावप्रतियोगितावच्छेदकत्वात्। न चैवमपि तादात्म्यसंबंधेन साध्यतायां घटो द्रव्यत्वादि
त्यादावव्याप्तिः। मदुक्तलक्षणघटकात्यंताभावपदसत्वेनात्यंताभावत्वनिरूपितप्र
तियोगिताया एव लक्षणघटकतया तादृशप्रतियोगितासामान्ये तादात्म्यसंबंधावच्छिन्न
त्वघटत्वावच्छेद्यत्वोभयाभावसत्वादिति वाच्यं। अत्यंताभावस्यात्र प्रयोजनविरहेणानु
पादेयत्वात्। न च तथापि संयोगादिसंबंधेन द्रव्यत्वादिसाध्यके द्रव्यं पार्थिवत्वादिसा

दावति व्याप्तिः। संयोगसंबंधावच्छिन्नद्रव्यत्वाभावनिरूपितप्रतियोगिताव्यक्तेः स्वावच्छेदकसंबं
धेन स्वावच्छेदकावच्छिन्नसंबंधेवाप्रसिद्धं। किंत्वभावांतरीयप्रतियोगिताव्यक्तेर्यत्र
तथा तत्र संयोगसंबंधावच्छिन्नत्वद्रव्यत्वत्वावच्छिन्नतोभयाभावसत्वादितिवाच्यं तदवच्छि
न्नसामानाधिकरण्यपदस्यैतेनैवतन्निरासात्। साध्यतावच्छेदकसंबंधेन तदवच्छिन्नसंबंधिनि
हेतुतावच्छेदकसंबंधेन संबंधित्वस्य तदर्थत्वात्। साध्यतावच्छेदकहेतुतावच्छेदकसंबंधघ
टितसाध्यसामानाधिकरण्याज्ञाने संबंधांतरेण साध्यसामानाधिकरण्यज्ञाने वानुमि
त्यनुदयात्। तादात्म्यादिरसनियामकसंबंधेन साध्यत्वे हेतुत्वे च व्याप्तिवारणाय अधिक
रणत्वं वृत्तित्वं चापहाय संबंधित्वप्रवेशः। न च तथापि व्यापकतालक्षणमतिव्याप्तमेव स्वा
वच्छेदकसंबंधेन स्वावच्छेदकावच्छिन्नसामान्यासंबंधिनिरूपकहेतुसंबंधिकप्रतियो
गितासामान्ये साध्यतावच्छेदकसंबंधावच्छिन्नत्वयद्धर्मपर्याप्तावच्छेदकताकत्वोभया
भावः तद्धर्मावच्छिन्नत्वं व्यापकत्वमिति स्वस्वेतरलक्षणत्वात्। स्वपदं प्रतियोगितापरमिति
×व्यापकं वाच्यं। साध्यतावच्छेदकसंबंधेन संबंधित्वे सतीत्यनेनापि व्यापकतालक्षणे विशे
×ता षणीयत्वात्। साध्यतावच्छेदकसंबंधाश्रयवृत्तित्वेन व्यापकतावच्छेदकधर्मोवाविशे
षणीयः। तेन द्रव्यत्वादेः संयोगसंबंधेन प्रमेयत्वादिरूपेणापि पृथिवीत्वव्यापकत्वाभ्युपग

मेपि न क्षतिः। न च प्रतियोगपसामानाधिकरण्यहेतुसामानाधिकरण्यसाध्यसामानाधिक
रण्यदलेषु सर्वत्रैव संबंधित्वप्रवेशेऽधिकरणत्ववृत्तित्वयोः क्वाप्यप्रवेशात् संयोगेन
गगनादेः द्रव्यत्वादिव्याप्यत्वपृथिवीत्वादेः संयोगेन गगनादिव्याप्यत्वं च स्यात् पृथिवीत्वाधि
करणे संयोगेन गगनाभाववत्त्वेपि तत्र संयोगेन तदीयप्रतियोगितावच्छेदकावच्छिन्नसंबंधि
त्वादिति वाच्यम् इष्टत्वात्। नन्वेतावता धूमादिव्यापकतावच्छेदकवह्नित्वाद्यवच्छिन्नसंयोगि
संयोगित्वादेरेव व्याप्तित्वे पर्वतवृत्तितादृशसंयोगित्वस्य समवायसंबंधेन रासभादौ व्य
भिचारिण्यपि सत्वाद्रासभादौ समवायेन तद्वत्तापरामर्शाद् धूमव्यापकवह्निसमाना
धिकरणरासभवान् पर्वत इत्याकारकादपि वह्न्यनुमित्यापत्तिः न्यायनये धूमत्वधर्मि
तानवच्छेदककव्याप्यत्वपरामर्शस्यापि अनुमितिहेतुत्वाभेष्टापत्तेः। रासभालिंगकव
ह्न्यनुमितेः व्याप्यांशे भ्रमपरामर्शजन्यत्वनियमादिति चेन्न। तादृशसंयोगित्वादिरूप
व्याप्तेः स्वघटकीभूतधूमत्वादिसंबंधेनैव ज्ञानमनुमितिहेतुः। ननु समवायादिसाक्षा
त्संबंधेनेसभ्युपगमात्। धूमत्वादेस्तत्संबंधिता च तदाश्रयवृत्तित्वसंबंधेन रासभत्वा
वच्छिन्ने धूमत्वसंबंधेन तद्वत्ताभ्रमादनुमितिरिष्यत एव। केचित्तु। तादृशसंयोगिवृत्ति
धूमत्वादिकमेव व्याप्तिः ननु तादृशसंयोगित्वादिमात्रं तादृशसंयोगिवृत्तिधूमत्ववद्रा

समवायेनवर्ततइतिभ्रमपरामर्शादनुमितिरिष्यतएवेत्याहुः।तदसत्।लाघवादुमत्वादिसं
बंधेनतादृशसंयोगित्वादेरेवव्याप्तित्वस्योचितत्वात्।ननुतथापिकपिसंयोगीत्वत्वादि
साध्यव्याप्यवृत्तिसाध्यकेऽव्याप्तिस्तदवस्था।समवायसंबंधावच्छिन्नकपिसंयोगत्वाव
च्छिन्नप्रतियोगितायाअपितादृशप्रतियोगितासामान्यांतर्गतत्वेनतत्र साध्यतावच्छेद
कसंबंधावच्छिन्नत्वकपिसंयोगत्वावच्छेद्यत्वोभयाभावविरहात्।नचसमवायावच्छिन्न
कपिसंयोगत्वावच्छिन्नप्रतियोगितायाःस्वावच्छेदकसमवायसंबंधेनस्वावच्छेदककपि
संयोगत्वावच्छिन्नसंबंधिभिन्नमेवनहेत्वधिकरणमेतद्वृक्षइतिकुतःतस्यास्तादृश
प्रतियोगितांतर्गतत्वमितिवाच्यं।कपिसंयोगस्याव्याप्यवृत्तितयातदत्यंताभावस्येव
तद्भिन्नत्वस्यापिमूलावच्छेदेनवृक्षेसत्वात्।अव्याप्यवृत्तिमतोऽन्योन्याभावस्याप्यव्या
प्यवृत्तित्वादितिचेन्न।कपिसंयोगादेरव्याप्यवृत्तित्वेपितत्संबंधितानाव्याप्यवृत्तिरतःक प्रा
पिसंयोगत्वावच्छिन्नसंबंधिभिन्नत्वनेतद्वृक्षइतिग्रंथकृतोऽभिप्रायात्।अव्याप्यवृत्तेर
त्यंताभावस्याव्याप्यवृत्तित्वेपितद्वदन्योन्याभावोनाव्याप्यवृत्तिरित्यभिप्रायाद्वा।नचान्यो
न्याभावस्याव्याप्यवृत्तित्वमिमग्रेवक्ष्यमाणत्वादितिमत्वेचतुरस्त्र।स्वत्वंत्वास्तां।स्वाव

च्छेदकसंबंधेन स्वावच्छेदकावच्छिन्नसंबंधिभिन्नत्वेन हेतुसंबंधिनो न विशेषणीयम्। किंतु
निरूपकहेतुसंबंधिनिष्ठस्वावच्छिन्नवृत्तीमान्यो ऽभावः तत्प्रतियोगितासामान्ये साध्यता
वच्छेदकसंबंधावच्छिन्नत्वं यद्धर्मपर्याप्तावच्छेदकत्वोभयाभावस्तद्धर्मावच्छिन्नसामाना
धिकरण्यमेव व्याप्तिर्निवक्तव्या। इत्थं चाव्याप्यवृत्तिसंबंधितान्याप्यवृत्तिमदन्योन्याभाव
प्य योरव्याप्यवृत्तित्वेपि न क्षतिः। वृत्तिमदभावीयविशेषणता विशेषसंबंधेन वक्तव्या तेन
समवायेन जातेरित्यादौ समवायसंबंधावच्छिन्नसत्तासामान्याभावादेर्विषयित्वाव्याप्यत्वा
दिसंबंधेन हेत्वधिकरणे ज्ञानादौ वर्त्तमानत्वेपि न क्षतिः। असंताभावान्योन्याभावयोर
भावस्तु न प्रतियोगितदवच्छेदकस्वरूपः। किंत्वतिरिक्त एव तेन घटत्वासंताभावप्र
त्वघटान्योन्याभाववान् द्रव्यत्वादित्यादौ नातिव्याप्तिः। यद्वा निरूपकहेतुसंबंधिनिष्ठस्वा
वच्छेदकसंबंधेन स्वावच्छेदकावच्छिन्नसंबंध्यनिरूपितवृत्तिमत्तानिरूपिते प्रतियोगि
तासामान्ये साध्यतावच्छेदकसंबंधावच्छिन्नत्व यद्धर्मावच्छिन्नत्वोभयाभावस्तद्धर्मावच्छि
न्नसाध्यसामानाधिकरण्यं व्याप्तिः। स्वपदं प्रतियोगितापरं। प्रथमसप्तम्यंतं वृत्तिवि
शेषणं। इत्थं च संबंधविशेषेणाव्याप्यवृत्तित्वेपि न क्षतिरिति प्राहुरिति कृतं पल्लवेन॥ राम

वह्निमान्धूमादित्यत्र तत्तद्व्यक्त्यभावमादाय पूर्वपक्षग्रंथोक्तमव्याप्तिमुद्धरति। अन्यनिवेशेति।
एतेनावच्छेदकानुधावनस्य व्यावृत्तिः फलतो दर्शिता। ननु विशेषाभावानां विशेषधर्मावच्छि
न्नप्रतियोगितानामेवावच्छेदकं सामान्यरूपमन्यथाऽभावप्रतियोगितावच्छेदकमेव तत्र स्यादभा
वांतरे प्रतियोगितांतरे च मानाभावात्। न चैवमापत्तिः। वह्निर्नास्तीत्यादिप्रत्ययेन वह्नित्वादेः प्र
तियोगितावच्छेदकत्वावगाहनात्तथा च वह्निमान्धूमादित्यादावव्याप्तिरिति हृदा संयोग
संबंधावच्छिन्नतत्तद्वह्नित्वावच्छिन्नप्रतियोगिताव्यक्तीनामेव तादृशप्रतियोगितासा
मान्यांतर्गतानां साध्यतावच्छेदकसंयोगादिसंबंधावच्छिन्नत्ववह्नित्वाद्यवच्छेद्यत्वोभ
यवत्त्वात्। न च वह्नित्वस्यापि तत्तद्वह्नित्वावच्छिन्नप्रतियोगिताव्यक्तीनामवच्छेदकत्वे त
त्प्रतियोगिताव्यक्तयो न तादृशप्रतियोगितासामान्यांतर्गता वह्नेस्तु संबंधिनः पर्व
तादेरात्माकाशादेश्च तदवच्छेदकसंयोगसंबंधेन तदवच्छेदकवह्नित्वावच्छिन्नसंबं
धित्वादपि तु विषयत्वकालदिङ्निरूपितविशेषणत्वादिसंबंधावच्छिन्नप्रतियो
गिताकवह्निघटाद्यभावप्रतियोगितैव तादृशप्रतियोगितासामान्यांतर्गता तत्र
च साध्यतावच्छेदकसंयोगसंबंधावच्छिन्नवह्नित्वाद्यवच्छेद्यत्वोभयाभावस्य सत्त्वा

भावाप्तिरिति वाच्यं। विशेषप्रतियोगितानामेव सामान्यधर्मस्यावच्छेदकत्वे स्वावच्छेदकता
७१ संबंधेन स्वावच्छेदकयत्किंचिदवच्छिन्नासंबंधित्वमेव हेतुसंबंधिनो विशेषणं वक्तव्यं ॥
॥ अन्यथा धूमवान्वन्हेरित्यादावतिव्याप्तेः। संयोगसंबंधावच्छिन्नधूमत्वावच्छिन्नप्रति
योगिताव्यक्तीनां स्वावच्छेदकसंयोगसंबंधेन स्वावच्छेदकद्रव्यत्वसत्तादिरूपसामा
न्यधर्मावच्छिन्नसंबंधित्वेन निरुक्तहेतुसंबंधि किंतु विषयित्वादिसंबंधावच्छिन्नधूम
घ घटाभावप्रतियोगिताव्यक्तीनामेव स्वावच्छेदकसंबंधेन स्वावच्छेदकावच्छिन्नासंब
न्धिहेतुसंबंधिनिष्ठाभावीयप्रतियोगितासामान्यांतर्गतता तत्र साध्यतावच्छेदकसंब
धावच्छिन्नत्व धूमत्वावच्छेदकतो भयाभावस्य सत्वात्। इत्थं च वन्हिमान्धूमादित्यादौ
तत्तद्वन्हित्वावच्छिन्नप्रतियोगिताव्यक्तीनामपि तत्तद्वन्हिस्वरूपयत्किंचित्स्वावच्छेदका
वच्छिन्नासंबंधी भवत्येव धूमसंबंधीयव्याप्तिदुर्वारेत्यत आह। धूमवतीति। पृथगेव
यंतमेकोग्रंथः इत्यप्रतीतेरिति। इति वन्हित्वावच्छिन्नप्रतियोगिताकाभावत्वविशेष्यता
वच्छेदककधूमवद्वृत्तित्वप्रकारकप्रतीतेर्धूमवद्वृत्तित्ववन्हित्वावच्छिन्नप्रतियोगिता राम
काभावयोः एवयथार्थत्वभ्रमत्वयोरापत्तेरित्यर्थः। वन्हित्वावच्छिन्नप्रतियोगिताकानां तत्त्व

त्वोभयां१

द्वह्नित्वावच्छिन्नाभावानां सर्वेषामेव धूमवद्वृत्तित्वादिति भावः। सामान्यावच्छिन्नप्रतियोगिताकः वह्नित्वावच्छिन्नप्रतियोगिताकः। पृथगेव तत्तद्वह्नित्वावच्छिन्नप्रतियोगिताका इति रिक्त एव
न च तत्प्रतीतौ वह्नेर्यावद्विशेषाभावो विशेष्य इति भ्रमत्वम प्रमात्वं चेति वाच्यं। तथापि यावद्रूपं द्रव्यवृत्तीति वत्प्रमात्वा भ्रमत्वापत्तेर्दुर्वारत्वात्। एतेन स्वावच्छिन्नैकदेश प्रतियोगि
ताकत्वसंबंधेन वह्नित्वं वह्नित्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन वह्नेर्वा व्यासज्यवृत्तित्वात् तेन संबंधेन विशेषाभावकूट एव पर्य्याप्तो इति न तु प्रत्येकाभाव इति तत्प्रती
तेर्भ्रमत्वमप्रमात्वं चेत्यपि निरस्तं। तथापि यावत्त्वस्य व्यासज्यवृत्तित्वेपि यावद्रूपं द्रव्यवृत्ती
ति प्रतीतेः प्रमात्वा भ्रमत्ववत्तत्प्रतीतेः प्रमात्वा भ्रमत्वापत्तेर्दुर्वारत्वात्। न च वह्नेर्यावद्विशेषाभावाधि
करणवृत्तित्वविशिष्टाभावस्य तत्र विशेष्यतया भ्रमत्वमप्रमात्वं चेति वाच्यं। विशिष्टं तस्य तत्रा
नुल्लेखात्तदुल्लेखेपि विशिष्टस्यानतिरिक्ततया गुणे गुणकर्मान्यत्वविशिष्टसत्त्वेति प्रतीतिवत्प्र
मात्वाभ्रमत्वापत्तेर्दुर्वारत्वाच्च। एतेन यथा विशिष्टसत्तायाः सत्तानतिरिक्तत्वेपि विशिष्टसत्ता
त्वावच्छिन्नाधारता न गुणादौ तथा तत्तद्वह्न्यभावानामेव वह्नित्वावच्छिन्नप्रतियोगिता

७२ कत्वेपि वान्हित्वावछिन्नप्रतियोगिताकत्वावछिन्नानां तेषामाधारता न धूमवतीति तत्प्रती
72 तेर्भ्रमत्वमप्रमात्वं चेत्यपि निरस्तं। तथापि गुणे गुणकर्मान्यत्वविशिष्टसत्तेति विशिष्टसत्ताया
गुणाधेयतावगाहिप्रतीतेः प्रमात्वाद्विव धूमवति वान्हिर्नास्तीति धूमवदाधेयतावगाहिप्रती
तेः भ्रमत्वाद्यापत्तेर्दुर्वारत्वात्। न च स्वावछिन्नतत्तत्प्रतियोगिताकत्वसंबंधेन वह्नित्वं वान्हि
त्वावछिन्नतत्तत्प्रतियोगिताकत्वसंबंधेन वान्हिर्वा अव्याप्यवृत्ति नेत्थं जलह्रदाद्यवछेदेनै
व विशेषाभावेषु वर्त्तते न तु धूमाधिकरणावछेदेनेति न तत्प्रतीतेः प्रमात्वमिति वाच्यं। ताव
ता धुमवति वान्हित्वादेरवछेदकत्वावगाहिप्रतीतेरप्रमात्वोपपादनेपि विशेषणताविशे
षावछिन्नासाधेयतासंबंधेन धूमवत्सप्रकारकवान्हित्वावछिन्नप्रतियोगिताकाभावvi
शेष्यकयथोक्तप्रतीतेः प्रमात्वापत्तेर्दुर्वारत्वात्। अन्यथा गुणादेः सत्ताविशिष्टद्रव्यवृत्तित्वा
नवछेदकतया द्रव्यवृत्तिसत्तो गुण इति प्रतीतेरप्यप्रमात्वापत्तेः। न च यथा गुणकर्मा
न्यत्वविशिष्टसत्तावान्गुण इति प्रतीतिर्न प्रमा विशिष्टसत्तायाः सत्तानतिरिक्तत्वेपि वि
शिष्टसत्तात्वावछिन्नाधारतायाः गुणादौ विरहात्। गुणे न कर्मान्यत्वविशिष्टसत्ते
ति स्वाधेयतोल्लेखिप्रतीतिश्च प्रमैव तथेहापि धूमवान्न वान्हिसामान्याभाववानिति प्र राम

तीतिर्भ्रमात्तत्तद्धूमाभावानामेव वह्नित्वावच्छिन्नप्रतियोगिताकत्वेपि तेषां तद्वह्न्याधा
रतायाधूमवति विरहात्। ~~एवमनुभवापलापेऽन्यस्येवाभावस्य~~ धूमवति वह्निर्नास्ती
ति आधेयतोल्लेखिप्रतीतिस्तु प्रमैव न तु भ्रम इति वाच्यं। अननुभवापलापात्।
एवमनुभवापलापेऽन्यस्येवाभावस्य घटपटगोत्वादिसकलप्रतियोगिकत्वस्य सुव
चतयाऽभावमात्रभेदविलोपापत्तेः। घटवान् घटसामान्याभाववानिति प्रतीतिर्न प्र
मा घटवति घटसामान्याभावत्वावच्छिन्नाधारताविरहात्। घटवति घटो नास्तीत्याधे
यतोल्लेखिप्रतीतिश्च न प्रमा भवत्येवेति क्रमेणानुभवापलापस्य सर्वत्र सुकरत्वादिह
ति भावः। सामान्याभावस्यातिरिक्तत्वे प्रकृष्टतमयुक्तिमभिधाय बाधकं भासान्तरमा
ह। अन्यथेति। यदि लाघवात्तत्तद्वह्नित्वावच्छिन्नप्रतियोगिताकाभाव एव वह्नित्वावच्छिन्न
प्रतियोगिताकस्तदेत्यर्थः। तुल्ययुक्त्या तत्तद्रूपत्वावच्छिन्नप्रतियोगिताकाभावानामे
व रूपत्वावच्छिन्नप्रतियोगिताकाभावतया तदोषः। सकलप्रसिद्धरूपाभाव इति वा
युः पृथिवीत्वाविरूपत्वावच्छिन्नप्रतियोगिताकाभाववान् जलरूपत्वावच्छिन्नप्रतियो

७३ गिताकाभाववान्तेजोरूपत्वावच्छिन्नप्रतियोगिताकाभाववांश्चेति सकलप्रसिद्धरूपान्यंता
भावानां निर्णये वायुपृथिवीरूपवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभाववान् जलरूप
73 वत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभाववान्तेजोरूपवत्त्वावच्छिन्नप्रतियोगिताकान्योन्या
भाववांश्चेति सकलप्रसिद्धरूपवदन्योन्याभावानां निर्णये चेत्यर्थः।वाय्यावितिअयं च रू
पतदभावविशेष्यको वायुविशेषणकविरुद्धयोरेकधर्मिसंबंधावगाहिज्ञानस्यैव संश
यत्वात् ननु विशिष्टरूद्वैभयप्रकारितापि नियता द्वितीयस्तु रूपतद्वदन्योन्याभावकोटि
को वायुविशेष्यक इति नाभेदः।निश्चितत्वादिति।निश्चितत्वेन संशयकोटित्वासंभवाद
तिरिक्तसामान्याभावस्य चानंगीकारादित्यर्थः।तथा चातिरिक्तसामान्याभावानभ्यु
पगमे संशयविषयोऽभाव एव दुर्लभ इति भावः।यद्यपि वायौ रूपं न वेति संशयं प्रति रू
पाभावनिश्चयो न विरोधी किंतु रूपतदभावान्यतरविशेष्यकाधेयतासंबंधावच्छिन्न
वा भावनिश्चय एव विरोधी तथाप्यधिकरणे तत्तदभावान्यतरनिश्चयोऽपि तत्तद
भावोभयविशेष्याधिकरणाप्रकारकसंशयविरोधीत्यभिप्रायः।वायुरूपवान्तदभाव

वान्वेतिवायुविशेषकसंशयएववास्यतात्पर्य्यंएतच्चापाततःविशेषाभावानांतत्तद्रूपत्वावच्छिन्नप्र
तियोगिताकाभावत्वेननिश्चितत्वेपिरूपत्वावच्छिन्नप्रतियोगिताकाभावत्वप्रकारेणसंशयविषय
त्वसंभवात्तेनापिरूपेणविशेषाभावानांनिर्णयेतथासंशयस्यसामान्याभावातिरिक्तत्ववा
दिनयेप्यसिद्धत्वादितिध्येयं।शेषमसमस्तसिद्धांतरहस्येऽनुसंधेयं।पक्षेसादि।स्वपदं
हेत्वभिमतपरं।कपिसंयोगिएतद्वृक्षत्वादित्यादावव्याप्तिवारणायप्रतियोगिव्यधिक
रणेति।स्वपदार्थस्यहेतोर्विशेषणं।तदर्थश्चप्रतियोग्यनधिकरणवृत्तित्वं।ननुतथा
पिवह्निमान्धूमाद्रूपवान्पृथिवीत्वादित्यादिनानाव्यक्तिसाध्यकेऽव्याप्तिः।चालनी
न्यायेनसर्वेषामेववह्न्यादीनांहेतुसमानाधिकरणासंताभावप्रतियोगित्वात्तत्तावा
न्द्रव्यत्वादिसाध्यकव्यक्तिसाध्यकेप्यव्याप्तिश्चहेतुसमानाधिकरणविशिष्टाभावद्वि
त्वाद्यवच्छिन्नाभावप्रतियोगित्वात्सत्तादेःगुणकर्मान्यत्वविशिष्टसत्तावान्जातेः
मूर्तत्वमूर्त्तत्वोभयवान्मूर्त्तत्वादित्यादावतिव्याप्तिवारणायप्रतियोगिव्यधिकर
णपदेनप्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणत्वस्यावश्यंविशेषणीय
त्वात्इतिचेन्न।अप्रतियोगिपदस्यतादृशप्रतियोगितानवच्छेदकसाध्यतावच्छे

दकावच्छिन्नपरत्वात्। नचैवं पूर्वस्मादभेदः। तत्र तादृशप्रतियोगितानवच्छेदकवन्हित्वावच्छिन्न
यत्किंचिद्वन्हिसामानाधिकरण्येवान्हिसामान्यधूमसामान्ययोर्व्याप्तिरत एव वन्हित्वरूपेणा
योगोलकीयवन्हेरपि धूमो व्याप्य इत्युक्तमिदानीं तु तादृशप्रतियोगितानवच्छेदकवन्हित्वाव
च्छिन्नतत्तद्वन्हिना सम तत्तद्धूमस्य सामानाधिकरण्ये वन्हित्वधूमत्वरूपेण तत्तद्वन्हित
त्तद्धूमयोर्व्याप्तिः। वन्हित्वरूपेणाप्ययोगोलकीयवान्हिर्व्याप्यो न धूम इत्युच्यत इत्येव वि
शेषोऽन्यत्सर्वं पूर्ववदितिदिक्॥ नन्वेतल्लक्षणाद्यपक्षे द्रव्यत्वत्वाद्यवच्छिन्नविधेयिकाद्य
टोद्रव्यत्ववानित्यादिरूपैवानुमितिः सर्वत्र स्यात् ननु कदाचिदपि स्वरूपतो द्रव्यत्वादि
विधेयिका घटो द्रव्यमित्यादिरूपा एतयोर्द्वयोरेव साध्यतावच्छेदकघटितत्वात्। न
च साध्यतावच्छेदकघटितत्वेप्येतयोरेव ज्ञाने द्रव्यत्वत्वाद्यवच्छिन्नविधेयकानु
मितित्वस्वरूपतो द्रव्यत्वादिविधेयकानुमितावपि हेतुः द्रव्यत्वत्वाद्यतिरिक्तानव
च्छिन्नद्रव्यत्वादिविधेयकानुमितित्वस्यैव कार्यतावच्छेदकत्वादिति वाच्यं। तथा
सति द्रव्यत्वाद्यनुमितेर्नियमतो द्विविधविषयत्वापत्तेः। द्रव्यत्वत्वादिघटकतया
स्वरूपतो द्रव्यत्वादिविशिष्टबुद्धिजनकीभूतस्य स्वरूपतो द्रव्यत्वादिज्ञानस्या

पिसर्वत्रसत्वादितिचेन्न।स्वरूपतो द्रव्यत्वादिविधेयकानुमितेरसिद्धेः घटो द्रव्यत्ववानित्यादिरूपा
या एवं द्रव्यत्वसाध्यवच्छिन्नविधेयकानुमितेः सर्वत्राभ्युपगमात्। एतदस्वरसेनैव चान्योन्याभा
वगर्भलक्षणांतरमाह। यत्समानाधिकरणेति। यत्पदं हेत्वभिमतपरं। यद्वत्त्वभूवतीति यदधि
करणं न भवतीत्यर्थः। यत्पदं साध्यपरं वन्हिमान्धूमात् सत्तावान्द्रव्यत्वादित्यादौ व्यतिरेकिसाध्य
कसाध्यकान्ये सामान्यादौ वर्त्तमानसाध्यवदन्योन्याभावमादायाव्याप्तिवारणाय हेतुस
मानाधिकरणत्वमन्योन्याभावविशेषणं। तच्च हेतुतावच्छेदकसंबंधेन यद्धेतुतावच्छे
दकावच्छिन्नहेतुसंबंधितत्र वर्त्तमानत्वं तेन वन्हिमान्धूमादित्यादौ हेत्वधिकरणे धूमा
वयवादौ वन्ह्यादिमतोऽन्योन्याभावस्य वृत्तावपि नाव्याप्तिः। न वा द्रव्यं गुणकर्मान्यत्ववििश
ष्टसत्वादित्यादौ सत्ताद्यधिकरणगुणादौ द्रव्यत्वादिमतोऽन्योन्याभावस्य सत्वेप्यव्याप्तिः
तादात्म्यादिवृत्तिनियामकसंबंधेन हेतुतायामव्याप्तिवारणायाधिकरणत्वमपहाय
संबंधित्वप्रवेशः। वर्त्तमानत्वं च विशेषणताविशेषसंबंधेन स्व साध्यप्रतियोगिका
भाववत्तिसाध्यीयप्रतियोगित्वतदवच्छेदकत्वान्यतरावच्छेदकसंबंधेन वाच्यं।
तेन सत्तावान् जातेरित्यादौ हेत्वधिकरणे ज्ञानादौ विषयित्वकालिकविशेषणता
व्याप्यवृत्तित्वादिसंबंधेन सत्तादिमदन्योन्याभावस्य वृत्तावपि नाव्याप्तिः। यदि च

वक्ष्यमाणयुक्त्याप्रतियोगिभिन्नत्वं निरुक्तहेतुसंबंधिनः प्रतियोग्यनिरूपितत्ववातद्वर्त्ति
मानत्वस्य विशेषणमुपादीयते । तदा तु वर्त्तमानत्वं येनकेनचित्संबंधेनेव ग्राह्यं न तु संबंध
विशेषो निवेशनीयः । वह्निमान्धूमादित्यादौ वाच्यं ज्ञेयत्वादित्यादौ वह्न्यादिमतः संयोगादिसंबंधे
नासंताभावस्य हेतुसमानाधिकरणत्वादसंभववारणायान्योन्याभावत्वनिरूपितप्रतियोगिता
लाभार्थमन्योन्यपदं यथाश्रुतेऽसंताभावस्यापि स्वावच्छिन्नभिन्नभेदात्मकतयाऽन्यो
न्याभावत्वेन तद्दोषतादवस्थ्यात् । न नु तथापि वह्निमान्धूमादित्यादौ सर्वेषामेव साध्यवद्भ
न्नानां चालनीन्यायेन निरूक्तहेतुसमानाधिकरणस्य तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगि
ताकान्योन्याभावस्य प्रतियोगितावत्ता दृशव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताका
न्योन्याभावस्य प्रतियोगितावच्छासंभवः । न च निरूक्तहेतुसमानाधिकरणान्योन्याभाव
प्रतियोगितानवच्छेदकं यत्साध्यं तेन समं सामानाधिकरण्यं विवक्षितमिति वाच्यं । त
थापि वह्निमान्धूमात् सत्तावान् जातिमत्वादित्यादौ वह्न्यादेर्निरूक्तहेतुसमानाधिक
रणस्य तत्तदधिकरणवृत्तित्वविशिष्टवह्न्यादिमत्वावच्छिन्नप्रतियोगिताकान्योन्या
भावस्य [redacted] त्तिधर्मावच्छिन्नवह्निघटोभयाद्यवच्छिन्नप्र

तियोगिताकान्योन्याभावस्यचप्रतियोगितावच्छेदकत्वेनासंभवतादवस्थ्यात्।अथानव
च्छेदकत्वंपर्याप्त्याख्यसंबंधेनावच्छेदकताशून्यत्वं।नचतथापिवन्हिमान्धूमादित्यादौवा
ल्कनीन्यायेनपूर्वेषामेवसाध्यव्यक्तीनांसाधनसमानाधिकरणान्योन्याभावप्रति
योगितावच्छेदकतापर्याप्त्यधिकरणत्वादव्याप्तिर्दुर्वारेतिवाच्यं।जात्यखंडोपाध्यति
रिक्तपदार्थस्यस्वरूपतोऽभावप्रतियोगितानवच्छेदकत्वेनतयावन्ह्यादेरवच्छेदकता
पर्याप्त्यधिकरणत्वाभावादितिचेन्न।सत्ताव्याप्यजातिमान्जातिमत्त्वादित्यादौतथाप्यव्याप्तेः।स
र्वेषामेवसत्ताव्याप्यजातीनांस्वरूपतःसाधनसमानाधिकरणान्योन्याभावप्रतियोगितावच्
छेदकतापर्याप्त्यधिकरणत्वात्।गुणकर्मान्यत्वविशिष्टसत्तावान्जातेरित्यादावतिव्याप्तेश्च
सत्तायापर्याप्त्याख्यसंबंधेनतादृशावच्छेदकताशून्यतयाविशिष्टसत्तायाअपितथात्वा
त्।विशिष्टसत्तायाःसत्तानतिरिक्तत्वात्।महानसीयवन्हिमान्धूमादित्यादावतिव्याप्तेश्चजा
सखंडो[redacted]पाध्यतिरिक्तपदार्थस्यस्वरूपतोऽनवच्छेदकतयामहानसीयवन्ह्यादे
रपिपर्याप्त्याख्यसंबंधेनतादृशावच्छेदकताशून्यत्वात्।एतेननिरुक्तहेतुसमानाधिकर
णान्योन्याभावप्रतियोगितावच्छेदकत्वावच्छेदकतायापर्याप्त्यनधिकरणंयत्साध्यताव

म०माथुरी

76

छेदकं तदवच्छिन्नसामानाधिकरण्यं विवक्षितमतो नासंभवः सद्धेतौ वह्न्यादेः साध्यतावच्छेद
कस्य पर्याप्त्याख्यसंबंधेन साधनसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकतावच्छेदक
त्वस्य कदाचिदप्यसंभवात् सत्ताव्याप्यजातिमा जातिमत्त्वादिसाध्ये सर्वासामेव सत्ताव्याप्यजा
तीनां स्वरूपतः साधनसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकत्वेऽपि साध्यतावच्छे
दकीभूतसत्ताव्याप्यजातिरूपेणानवच्छेदकत्वादित्यपि निरस्तं द्रव्यत्वव्याप्यजातिमद्वान्
द्रव्यसमवायित्वादित्यादि नानाजातिसाध्यतावच्छेदकस्थलेऽव्याप्तेर्दुर्वारत्वात् साध्यतावच्छे
दकीभूतानां सर्वासामेव पृथ्वीत्वजलत्वादिरूपाणां द्रव्यत्वव्याप्यजातीनां चालनीन्यायेन सा
धनसमानाधिकरणपृथिवीजलादिमदन्योन्याभावप्रतियोगितावच्छेदकतावच्छेदकताव
[illegible]ऽप्यधिकरणत्वात् । विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तेश्च सत्तात्वस्य पर्याप्त्य
ख्यसंबंधेन तादृशप्रतियोगितावच्छेदकतावच्छेदकत्वस[illegible]त्वेन साध्यतावच्छेदक
स्य विशिष्टसत्तात्वस्यापि तथात्वात् विशिष्टसत्तात्वस्य सत्तावानतिरिक्तत्वात् महा
नसीयत्वविशिष्टवह्निमान् धूमादित्यादावतिव्याप्तेश्च वह्नित्वस्य पर्याप्त्याख्यसंबंधे
न तादृशप्रतियोगितावच्छेदक[illegible]च्छेदकत्वशून्यतया साध्यतावच्छेदकस्य महानसीय

व

राम
७२

तापि विशिष्टवह्नित्वस्यापि तथात्वात् विशिष्टवह्नित्वस्य वह्नित्वानतिरिक्तत्वात्। तद्वद्धूमान्द
द्रिसंयोगावद्विसाद्यावत्तिव्याप्तेश्च। जातसखंडोपाध्यतिरिक्तपदार्थस्य स्वरूपतोऽनवच्छेद
कतया साध्यतावच्छेदकीभूततद्वद्व्यक्तेः पर्याप्त्याख्यसंबंधेन तादृशप्रतियोगितावच्छेद
कत्वशून्यत्वादस्यापि साध्यतावच्छेदकघटितत्वेन स्वरूपतो द्रव्यत्वादिविधेयकानुमिते
रेतज्ज्ञानाद्यावच्छसंभवापत्तेश्च। यत्र हि स्वरूपतो द्रव्यत्वादेः साध्यत्वं न तु साध्यतावच्छेदकत्व
मप्यस्ति। तत्र निरुक्तहेतुसमानाधिकरणीयान्योन्याभावत्वनिरूपितप्रतियोगितास
मान्ये यदधिकरणत्वनिष्ठपर्याप्त्यवच्छेदकताकत्वाभावस्तत्सामानाधिकरण्यं स्वरूपत
स्तस्य व्याप्तिरितिविवक्षणीयं। यद्वा स्वरूपतः साध्यव्याप्तिपरं। वह्निमान्धूमाद्रूपवा
न्पृथिवीत्वादित्यादौ किंचिद्व्यक्तिभिन्नसाध्यके चास्यालक्ष्यमेव जातसखंडोपाध्यतिरिक्तप
दि दार्थस्य स्वरूपतो व्याप्यत्वमप्युपगमादिति नाव्याप्तिः न च तथापि। विशिष्टसत्तावाञ्जा
तेरित्यादावतिव्याप्तिर्विशिष्टसत्तायाः सत्तानतिरिक्ततेन सत्ताया एव साध्यतया त
दधिकरणत्वपर्याप्त्यवच्छेदकताकत्वाभावस्य जातिमद्भिन्नान्योन्याभावप्रतियोगिता

सामान्येसत्वादितिवाच्यं। जात्यादौविशिष्टसत्तात्वरूपेणाविशिष्टसत्तायाव्याप्यत्वानभ्युपगमेपिस्वरूप
तोविशिष्टसत्ताव्याप्यत्वस्यसर्वसिद्धत्वात्। किंचिदवच्छिन्नसाध्यकस्थलेनुक्तिरूक्तहेतुसमाना
धिकरणीयान्योन्याभावत्वनिरूपितप्रतियोगितासामान्येयद्धर्मावच्छिन्नाधिकरणत्वनिरूप
यांशेतावच्छेदकत्वाभाववत्तद्धर्मावच्छिन्नसामानाधिकरण्यंतद्धर्मावच्छिन्नस्यव्याप्तिरितिवि
वक्षणीयं। यत्रयेनरूपेणयस्यसाध्यतावच्छेदकत्वं तत्रतेनरूपेणतदेवयद्धर्मपदेनग्राह्यम्। इ
ष्टंचवह्निमान्धूमादित्यादौवह्नित्वादेःस्वरूपतएवसाध्यतावच्छेदकत्वात्स्वरूपतोवह्नित्वादिक
मेवयद्धर्मपदेनग्राह्यं। महानसीयत्वविशिष्टवह्निमान्धूमादित्यादौमहानसीयत्वादिविशिष्ट
त्वेनैववह्नित्वादेःसाध्यतावच्छेदकतयातादृशविशिष्टवह्नित्वादिकमेवयद्धर्मपदेनग्राह्यं। द्रव्य
त्वव्याप्यजातिमद्द्रव्यसमवायित्वादित्यादौपृथिवीत्वजलत्वादिरूपाणांद्रव्यत्वव्याप्यजातीनां
द्रव्यत्वव्याप्यजातित्वरूपेणैवसाध्यतावच्छेदकतयातादृशजातित्वविशिष्टमेवयद्धर्मपदग्राह्यं
नतुस्वरूपतःपृथिवीत्वजलत्वादिकमित्यादिस्वयमुह्यं। अत्राधिकरणत्वांशस्यानतिप्रयोजकतया
तदपहायलक्षणांतरमाह। स्वसमानाधिकरणेति। स्वपदंहेतुमभिमतपरं। यद्धत्वकत्वमिति। यद्वृत्तित्व
मित्यर्थः। यस्यतस्यतद्व्याप्यत्वमितिशेषः। तथाचयत्रस्वरूपतोद्रव्यत्वादेःसाध्यत्वंतत्रनिरू

य

क्तहेतुसमानाधिकरणीयान्योन्याभावत्वनिरूपितप्रतियोगितासामान्ये यन्निष्ठपर्याप्तावच्छेदकताक
ताभावस्तत्सामानाधिकरण्यं स्वरूपतस्तस्य व्याप्तिरिति वक्तव्यं। यत्पदं स्वरूपतः साध्यव्यक्तिपरं। किं वच्छिन्ने
च्चिद्वच्छिन्नसाध्यकस्थले तादृशप्रतियोगितासामान्ये यद्धर्मनिष्ठपर्याप्तावच्छेदकताया ताभावस्त
द्धर्मावच्छिन्नसामानाधिकरण्यं तद्धर्मावच्छिन्नस्य व्याप्तिरिति वक्तव्यं। ननु तथापि द्रव्यं पृथिवीत्वा
या५ द्वह्निमान्धूमादित्यादौ कालिकविशेषणत्वसमवायादिसंबंधेन साध्यवतोऽन्योन्याभावस्य हेतुधि
करणे सत्त्वादसंभवः। न च प्रतियोगिता साध्यतावच्छेदकसंबंधावच्छिन्नावच्छेदकताकत्वेन वि
शेषणीयेति वाच्यं। घटवान्कालपरिमाणात् घटवान्नेतिसज्ञानत्वादित्यादौ तादृशप्रतियोगित्वाप्र
सिद्धेरिति चेन्न। साध्यतावच्छेदकसंबंधावच्छिन्नत्वेनावच्छेदकताया विशेषणात्केवलान्वयि
निवाच्यत्वादिपर्याप्तस्वरूपसंबंधावच्छिन्नावच्छेदकताकत्वसंयोगादिसंबंधेन वाच्यादेरन्यते
भावप्रतियोगितायामेव प्रसिद्धं साध्यतावच्छेदकसंबंधभेदेन व्याप्तिभेदात्। यत्र तादात्म्यसंबंधेन
किंचिदवच्छिन्नस्य साध्यत्वं तत्र तादृशान्योन्याभावत्वनिरूपितप्रतियोगितासामान्ये यद्धर्मपर्याप्ताव
छेदकताकत्वाभावस्तद्धर्मावच्छिन्नसामानाधिकरण्यमेव वक्तव्यं। यद्धर्मपदं साध्यतावच्छेदक
परा। अवच्छेदकता च साध्यतावच्छेदकतावच्छेदकसंबंधावच्छिन्नत्वेन विशेषणीया सर्वमन्य
दसंतभावगर्भप्रथमलक्षणवदवसेयमिति संक्षेपः॥ न

(प्रतियोगीप्रकारेण प्रतियोगिनोऽभावाः प्रतियोगिके प्रतियोगितावच्छेदकता तादात्म्यसंबंधावच्छिन्नभेदप्रतियोगितावच्छेद [illegible]

नरणमाथुरी नं० ५५-५

न्यसंताभावगर्भद्वितीयलक्षणेपक्षेव्यधिकरणधूमस्य वह्नित्वरूपेणाव्यधिकरणवह्निव्याप्यत्वं कथं
स्यात्सामानाधिकरण्यविरहादित्यत आह। अन्योन्येति। प्रतियोगित्वादितिपरंपरस्परसामानाधिकरण्यवि
रहेणेतिशेषः। यथाश्रुते नानाव्यक्तिसाध्यकाद्यनुरोधेनानवच्छेदकत्वपर्यंतानुधावनस्यावश्यक
त्वेन तादृशप्रतियोगित्वस्याकिंचित्करत्वात् इशे च परस्परसामानाधिकरण्यविरह एव तस्य हेतुत्वा
त्। न चैवमन्यवृत्तिवह्नेरन्यवृत्तिधूमवन्निष्ठात्यंताभावप्रतियोगित्वादिरस्त्येव सम्यक्तया तद्व
तोन्योन्याभावप्रतियोगित्वादित्यर्थमिति वाच्यं। अन्यवृत्तिवह्नेरन्यवृत्तिधूमवन्निष्ठात्यंता
भावप्रतियोगित्वेपि द्रव्यस्याव्याप्यवृत्तित्वनये सामानाधिकरण्यसंभवतीत्यनुशयेन तदुपाद न
नादिति। नचैवमिति। न व्याप्तिः नैयायिकाभिमतव्याप्तिरित्यर्थः। तथा च धूमत्वेन व्याप्यतावच्छेदकत्वं न
स्यात् व्याप्तेः प्रतिस्वं भेदेन धूमत्वस्यातिप्रसक्तत्वादिति भावः। तथात्वेनाव्याप्याश्रयत्वेन
धूममात्रस्येति। तथा च व्याप्तेः प्रतिस्वं भेदेपि वह्निधूमव्याप्तित्वावच्छिन्नस्यानतिप्रसक्त
त्वाद्धूमत्वमवच्छेदकं यथा प्रतियोगितायाः प्रतिव्यक्तिभिन्नत्वेपि तत्तदभावप्रतियोगितात्वा
वच्छिन्नस्यानतिप्रसक्तत्वाद्घटत्वादिकमवच्छेदकमिति भावः। ननु सर्वास्मिन्नेव लक्षणे
धूमसमानाधिकरणवह्निरपि धूमव्याप्यः स्यात् एवं च युगपदुत्पन्नविशिष्टव्यक्तिद्वयो
रपि कालिकसमव्याप्ति स्यादित्यत्र आपत्तिमाह। धूमेत्यादि। व्याप्तिरेव कालिकसमव्या

राम